# श्रीमद्भगवद्गीता

# Śrīmad-Bhagavad-gītā

# The Song of the Lord

Text Only

Version 0.1

July 19, 2003

# Contents


**1** सैन्यदर्शनम् 5

**2** साङ्ख्ययोगः 9

**3** कर्मयोगः 15

**4** ज्ञानविभागयोगः 19

**5** कर्मसन्न्यासयोगः 23

**6** ध्यानयोगः 27

**7** विज्ञानयोगः 31

**8** तारकब्रह्मयोगः 35

**9** राजगुह्ययोगः 39

**10** विभूतियोगः 43

**11** विश्वरूपदर्शनयोगः 47

**12** भक्तियोगः 51

**13 प्रकृतिपुरुषविवेकयोगः** 53

**14 गुणत्रयविभागयोगः** 57

**15 पुरुषोत्तमयोगः** 59

**16 दैवासुरसम्पद्विभागयोगः** 61

**17 श्रद्धात्रयविभागयोगः** 63

**18 मोक्षयोगः** 67

# Chapter 1

# सैन्यदर्शनम्

1.1 धृतराष्ट्र उवाच
1.1a धर्मक्षेत्रे कुरुक्षेत्रे समवेता युयुत्सवः
1.1b मामकाः पाण्डवाश्चैव किम् अकुर्वत संजय
1.2 संजय उवाच
1.2a दृष्ट्वा तु पाण्डवानीकं व्यूढं दुर्योधनस्तदा
1.2b आचार्यम् उपसंगम्य राजा वचनम् अब्रवीत्
1.3a पश्यैतां पाण्डुपुत्राणाम् आचार्य महतीं चमूम्
1.3b व्यूढां द्रुपदपुत्रेण तव शिष्येण धीमता
1.4a अत्र शूरा महेष्वासा भीमार्जुनसमा युधि
1.4b युयुधानो विराटश्च द्रुपदश्च महारथः
1.5a धृष्टकेतुश्चेकितानः काशिराजश्च वीर्यवान्
1.5b पुरुजित् कुन्तिभोजश्च शैब्यश्च नरपुंगवः
1.6a युधामन्युश्च विक्रान्त उत्तमौजाश्च वीर्यवान्
1.6b सौभद्रो द्रौपदेयाश्च सर्व एव महारथाः
1.7a अस्माकं तु विशिष्टा ये तान्निबोध द्विजोत्तम
1.7b नायका मम सैन्यस्य संज्ञार्थं तान्ब्रवीमि ते
1.8a भवान्भीष्मश्च कर्णश्च कृपश्च समितिंजयः
1.8b अश्वत्थामा विकर्णश्च सौमदत्तिर्जयद्रथः
1.9a अन्ये च बहवः शूरा मदर्थे त्यक्तजीविताः
1.9b नानाशस्त्रप्रहरणाः सर्वे युद्धविशारदाः
1.10a अपर्याप्तं तदस्माकं बलं भीष्माभिरक्षितम्
1.10b पर्याप्तं त्विदम् एतेषां बलं भीमाभिरक्षितम्
1.11a अयनेषु च सर्वेषु यथाभागम् अवस्थिताः

1.11b भीष्मम् एवाभिरक्षन्तु भवन्तः सर्व एव हि
1.12a तस्य संजनयन्हर्षं कुरुवृद्धः पितामहः
1.12b सिंहनादं विनद्योच्चैः शङ्खं दध्मौ प्रतापवान्
1.13a ततः शङ्खाश्च भेर्यश्च पणवानकगोमुखाः
1.13b सहसैवाभ्यहन्यन्त स शब्दस्तुमुलोऽभवत्
1.14a ततः श्वेतैर्हयैर्युक्ते महति स्यन्दने स्थितौ
1.14b माधवः पाण्डवश्चैव दिव्यौ शङ्खौ प्रदध्मतुः
1.15a पाञ्चजन्यं हृषीकेशो देवदत्तं धनंजयः
1.15b पौण्ड्रं दध्मौ महाशङ्खं भीमकर्मा वृकोदरः
1.16a अनन्तविजयं राजा कुन्तीपुत्रो युधिष्ठिरः
1.16b नकुलः सहदेवश्च सुघोषमणिपुष्पकौ
1.17a काश्यश्च परमेष्वासः शिखण्डी च महारथः
1.17b धृष्टद्युम्नो विराटश्च सात्यकिश्चापराजितः
1.18a द्रुपदो द्रौपदेयाश्च सर्वशः पृथिवीपते
1.18b सौभद्रश्च महाबाहुः शङ्खान् दध्मुः पृथक् पृथक्
1.19a स घोषो धार्तराष्ट्राणां हृदयानि व्यदारयत्
1.19b नभश्च पृथिवीं चैव तुमुलो व्यनुनादयन्
1.20a अथ व्यवस्थितान् दृष्ट्वा धार्तराष्ट्रान् कपिध्वजः
1.20b प्रवृत्ते शस्त्रसंपाते धनुरुद्यम्य पाण्डवः
1.21a हृषीकेशं तदा वाक्यम् इदम् आह महीपते
1.21b सेनयोरुभयोर्मध्ये रथं स्थापय मेऽच्युत
1.22a यावदेतान् निरीक्षेऽहं योद्धुकामान् अवस्थितान्
1.22b कैर्मया सह योद्धव्यम् अस्मिन् रणसमुद्यमे
1.23a योत्स्यमानान् अवेक्षेऽहं य एतेऽत्र समागताः
1.23b धार्तराष्ट्रस्य दुर्बुद्धेर्युद्धे प्रियचिकीर्षवः
1.24a एवम् उक्तो हृषीकेशो गुडाकेशेन भारत
1.24b सेनयोरुभयोर्मध्ये स्थापयित्वा रथोत्तमम्
1.25a भीष्मद्रोणप्रमुखतः सर्वेषां च महीक्षिताम्
1.25b उवाच पार्थ पश्यैतान् समवेतान् कुरून् इति
1.26a तत्रापश्यत् स्थितान् पार्थः पितृन् अथ पितामहान्
1.26b आचार्यान् मातुलान् भ्रातृन् पुत्रान् पौत्रान् सखींस्तथा
1.27a श्वशुरान् सुहृदश्चैव सेनयोरुभयोरपि
1.27b तान् समीक्ष्य स कौन्तेयः सर्वान् बन्धून् अवस्थितान्
1.28a कृपया परयाविष्टो विषीदन्न् इदम् अब्रवीत्
1.28b दृष्ट्वेमं स्वजनं कृष्ण युयुत्सुं समुपस्थितम्

1.29a सीदन्ति मम गात्राणि मुखं च परिशुष्यति
1.29b वेपथुश्च शरीरे मे रोमहर्षश्च जायते
1.30a गाण्डीवं स्रंसते हस्तात् त्वक् चैव परिदह्यते
1.30b न च शक्नोम्यवस्थातुं भ्रमतीव च मे मनः
1.31a निमित्तानि च पश्यामि विपरीतानि केशव
1.31b न च श्रेयोऽनुपश्यामि हत्वा स्वजनम् आहवे
1.32a न काङ्क्षे विजयं कृष्ण न च राज्यं सुखानि च
1.32b किं नो राज्येन गोविन्द किं भोगैर्जीवितेन वा
1.33a येषाम् अर्थे काङ्क्षितं नो राज्यं भोगाः सुखानि च
1.33b त इमेऽवस्थिता युद्धे प्राणांस्त्यक्त्वा धनानि च
1.34a आचार्याः पितरः पुत्रास्तथैव च पितामहाः
1.34b मातुलाः श्वशुराः पौत्राः श्यालाः संबन्धिनस्तथा
1.35a एतान् न हन्तुम् इच्छामि घ्नतोऽपि मधुसूदन
1.35b अपि त्रैलोक्यराज्यस्य हेतोः किं नु महीकृते
1.36a निहत्य धार्तराष्ट्रान् नः का प्रीतिः स्याज् जनार्दन
1.36b पापम् एवाश्रयेदस्मान् हत्वैतान् आततायिनः
1.37a तस्मान् नार्हा वयं हन्तुं धार्तराष्ट्रान् स्वबान्धवान्
1.37b स्वजनं हि कथं हत्वा सुखिनः स्याम माधव
1.38a यद्यप्येते न पश्यन्ति लोभोपहतचेतसः
1.38b कुलक्षयकृतं दोषं मित्रद्रोहे च पातकम्
1.39a कथं न ज्ञेयम् अस्माभिः पापादस्मान् निवर्तितुम्
1.39b कुलक्षयकृतं दोषं प्रपश्यद्भिर्जनार्दन
1.40a कुलक्षये प्रणश्यन्ति कुलधर्माः सनातनाः
1.40b धर्मे नष्टे कुलं कृत्स्नम् अधर्मोऽभिभवत्युत
1.41a अधर्माभिभवात् कृष्ण प्रदुष्यन्ति कुलस्त्रियः
1.41b स्त्रीषु दुष्टासु वार्ष्णेय जायते वर्णसंकरः
1.42a संकरो नरकायैव कुलघ्नानां कुलस्य च
1.42b पतन्ति पितरो ह्येषां लुप्तपिण्डोदकक्रियाः
1.43a दोषैरेतैः कुलघ्नानां वर्णसंकरकारकैः
1.43b उत्साद्यन्ते जातिधर्माः कुलधर्माश्च शाश्वताः
1.44a उत्सन्नकुलधर्माणां मनुष्याणां जनार्दन
1.44b नरके नियतं वासो भवतीत्यनुशुश्रुम
1.45a अहो बत महत् पापं कर्तुं व्यवसिता वयम्
1.45b यद्राज्यसुखलोभेन हन्तुं स्वजनम् उद्यताः
1.46a यदि माम् अप्रतीकारम् अशस्त्रं शस्त्रपाणयः
1.46b धार्तराष्ट्रा रणे हन्युस्तन् मे क्षेमतरं भवेत्

1.47a एवम् उक्त्वार्जुनः संख्ये रथोपस्थ उपाविशत्
1.47b विसृज्य सशरं चापं शोकसंविग्नमानसः

# Chapter 2

# साङ्ख्ययोगः

2.1 संजय उवाच
2.1a तं तथा कृपयाविष्टम् अश्रुपूर्णाकुलेक्षणम्
2.1b विषीदन्तम् इदं वाक्यम् उवाच मधुसूदनः
2.2 श्रीभगवान् उवाच
2.2b कुतस्त्वा कश्मलम् इदं विषमे समुपस्थितम्
2.2b अनार्यजुष्टम् अस्वर्ग्यम् अकीर्तिकरम् अर्जुन
2.3a क्लैब्यं मा स्म गमः पार्थ नैतत् त्वय्युपपद्यते
2.3b क्षुद्रं हृदयदौर्बल्यं त्यक्त्वोत्तिष्ठ परंतप
2.4 अर्जुन उवाच
2.4a कथं भीष्मम् अहं संख्ये द्रोणं च मधुसूदन
2.4b इषुभिः प्रतियोत्स्यामि पूजार्हावरिसूदन
2.5a गुरून् अहत्वा हि महानुभावाञ् श्रेयो भोक्तुं भैक्ष्यम् अपीह लोके
2.5b हत्वार्थकामांस्तु गुरून् इहैव भुञ्जीय भोगान् रुधिरप्रदिग्धान्
2.6a न चैतद्विद्मः कतरन् नो गरीयो यद्वा जयेम यदि वा नो जयेयुः
2.6b यान् एव हत्वा न जिजीविषामस् तेऽवस्थिताः प्रमुखे धार्तराष्ट्राः
2.7a कार्पण्यदोषोपहतस्वभावः पृच्छामि त्वां धर्मसंमूढचेताः
2.7b यच्छ्रेयः स्यान् निश्चितं ब्रूहि तन् मे शिष्यस्तेऽहं शाधि मां त्वां प्रपन्नम्
2.8a न हि प्रपश्यामि ममापनुद्याद् यच्छोकम् उच्छोषणम् इन्द्रियाणाम्
2.8b अवाप्य भूमावसपत्नम् ऋद्धं राज्यं सुराणाम् अपि चाधिपत्यम्
2.9 संजय उवाच
2.9a एवम् उक्त्वा हृषीकेशं गुडाकेशः परंतपः
2.9b न योत्स्य इति गोविन्दम् उक्त्वा तूष्णीं बभूव ह

2.10a तम् उवाच हृषीकेशः प्रहसन्न् इव भारत
2.10b सेनयोरुभयोर्मध्ये विषीदन्तम् इदं वचः
2.11 श्रीभगवान् उवाच
2.11a अशोच्यान् अन्वशोचस्त्वं प्रज्ञावादांश्च भाषसे
2.11b गतासून् अगतासूंश्च नानुशोचन्ति पण्डिताः
2.12a न त्वेवाहं जातु नासं न त्वं नेमे जनाधिपाः
2.12b न चैव न भविष्यामः सर्वे वयम् अतः परम्
2.13a देहिनोऽस्मिन् यथा देहे कौमारं यौवनं जरा
2.13b तथा देहान्तरप्राप्तिर्धीरस्तत्र न मुह्यति
2.14a मात्रास्पर्शास्तु कौन्तेय शीतोष्णसुखदुःखदाः
2.14b आगमापायिनोऽनित्यास्तांस्तितिक्षस्व भारत
2.15a यं हि न व्यथयन्त्येते पुरुषं पुरुषर्षभ
2.15b समदुःखसुखं धीरं सोऽमृतत्वाय कल्पते
2.16a नासतो विद्यते भावो नाभावो विद्यते सतः
2.16b उभयोरपि दृष्टोऽन्तस्त्वनयोस्तत्त्वदर्शिभिः
2.17a अविनाशि तु तद्विद्धि येन सर्वम् इदं ततम्
2.17b विनाशम् अव्ययस्यास्य न कश्चित् कर्तुम् अर्हति
2.18a अन्तवन्त इमे देहा नित्यस्योक्ताः शरीरिणः
2.18b अनाशिनोऽप्रमेयस्य तस्माद्युध्यस्व भारत
2.19a य एनं वेत्ति हन्तारं यश्चैनं मन्यते हतम्
2.19b उभौ तौ न विजानीतो नायं हन्ति न हन्यते
2.20a न जायते म्रियते वा कदा चिन् नायं भूत्वा भविता वा न भूयः
2.20b अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे
2.21a वेदाविनाशिनं नित्यं य एनम् अजम् अव्ययम्
2.21b कथं स पुरुषः पार्थ कं घातयति हन्ति कम्
2.22a वासांसि जीर्णानि यथा विहाय नवानि गृह्णाति नरोऽपराणि
2.22b तथा शरीराणि विहाय जीर्णानि अन्यानि संयाति नवानि देही
2.23a नैनं छिन्दन्ति शस्त्राणि नैनं दहति पावकः
2.23b न चैनं क्लेदयन्त्यापो न शोषयति मारुतः
2.24a अच्छेद्योऽयम् अदाह्योऽयम् अक्लेद्योऽशोष्य एव च
2.24b नित्यः सर्वगतः स्थाणुरचलोऽयं सनातनः
2.25a अव्यक्तोऽयम् अचिन्त्योऽयम् अविकार्योऽयम् उच्यते
2.25b तस्मादेवं विदित्वैनं नानुशोचितुम् अर्हसि
2.26a अथ चैनं नित्यजातं नित्यं वा मन्यसे मृतम्
2.26b तथापि त्वं महाबाहो नैवं शोचितुम् अर्हसि
2.27a जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च

2.27b तस्मादपरिहार्येऽर्थे न त्वं शोचितुम् अर्हसि
2.28a अव्यक्तादीनि भूतानि व्यक्तमध्यानि भारत
2.28b अव्यक्तनिधनान्येव तत्र का परिदेवना
2.29a आश्चर्यवत् पश्यति कश्चिदेनम् आश्चर्यवद्वदति तथैव चान्यः
2.29b आश्चर्यवच्चैनम् अन्यः शृणोति श्रुत्वाप्येनं वेद न चैव कश्चित्
2.30a देही नित्यम् अवध्योऽयं देहे सर्वस्य भारत
2.30b तस्मात् सर्वाणि भूतानि न त्वं शोचितुम् अर्हसि
2.31a स्वधर्मम् अपि चावेक्ष्य न विकम्पितुम् अर्हसि
2.31b धर्म्याद्धि युद्धाच्छ्रेयोऽन्यत् क्षत्रियस्य न विद्यते
2.32a यदृच्छया चोपपन्नं स्वर्गद्वारम् अपावृतम्
2.32b सुखिनः क्षत्रियाः पार्थ लभन्ते युद्धम् ईदृशम्
2.33a अथ चेत् त्वम् इमं धर्म्यं संग्रामं न करिष्यसि
2.33b ततः स्वधर्मं कीर्तिं च हित्वा पापम् अवाप्स्यसि
2.34a अकीर्तिं चापि भूतानि कथयिष्यन्ति तेऽव्ययाम्
2.34b संभावितस्य चाकीर्तिर्मरणादतिरिच्यते
2.35a भयाद्रणादुपरतं मंस्यन्ते त्वां महारथाः
2.35b येषां च त्वं बहुमतो भूत्वा यास्यसि लाघवम्
2.36a अवाच्यवादांश्च बहून् वदिष्यन्ति तवाहिताः
2.36b निन्दन्तस्तव सामर्थ्यं ततो दुःखतरं नु किम्
2.37a हतो वा प्राप्स्यसि स्वर्गं जित्वा वा भोक्ष्यसे महीम्
2.37b तस्मादुत्तिष्ठ कौन्तेय युद्धाय कृतनिश्चयः
2.38a सुखदुःखे समे कृत्वा लाभालाभौ जयाजयौ
2.38b ततो युद्धाय युज्यस्व नैवं पापम् अवाप्स्यसि
2.39a एषा तेऽभिहिता सांख्ये बुद्धिर्योगे त्विमां शृणु
2.39b बुद्ध्या युक्तो यया पार्थ कर्मबन्धं प्रहास्यसि
2.40a नेहाभिक्रमनाशोऽस्ति प्रत्यवायो न विद्यते
2.40b स्वल्पम् अप्यस्य धर्मस्य त्रायते महतो भयात्
2.41a व्यवसायात्मिका बुद्धिरेकेह कुरुनन्दन
2.41b बहुशाखा ह्यनन्ताश्च बुद्धयोऽव्यवसायिनाम्
2.42a याम् इमां पुष्पितां वाचं प्रवदन्त्यविपश्चितः
2.42b वेदवादरताः पार्थ नान्यदस्तीति वादिनः
2.43a कामात्मानः स्वर्गपरा जन्मकर्मफलप्रदाम्
2.43b क्रियाविशेषबहुलां भोगैश्वर्यगतिं प्रति
2.44a भोगैश्वर्यप्रसक्तानां तयापहृतचेतसाम्
2.44b व्यवसायात्मिका बुद्धिः समाधौ न विधीयते
2.45a त्रैगुण्यविषया वेदा निस्त्रैगुण्यो भवार्जुन

2.45b निर्द्वन्द्वो नित्यसत्त्वस्थो निर्योगक्षेम आत्मवान्
2.46a यावान् अर्थ उदपाने सर्वतः संप्लुतोदके
2.46b तावान् सर्वेषु वेदेषु ब्राह्मणस्य विजानतः
2.47a कर्मण्येवाधिकारस्ते मा फलेषु कदा चन
2.47b मा कर्मफलहेतुर्भूर्मा ते सङ्गोऽस्त्वकर्मणि
2.48a योगस्थः कुरु कर्माणि सङ्गं त्यक्त्वा धनंजय
2.48b सिद्ध्यसिद्ध्योः समो भूत्वा समत्वं योग उच्यते
2.49a दूरेण ह्यवरं कर्म बुद्धियोगाद्धनंजय
2.49b बुद्धौ शरणम् अन्विच्छ कृपणाः फलहेतवः
2.50a बुद्धियुक्तो जहातीह उभे सुकृतदुष्कृते
2.50b तस्माद्योगाय युज्यस्व योगः कर्मसु कौशलम्
2.51a कर्मजं बुद्धियुक्ता हि फलं त्यक्त्वा मनीषिणः
2.51b जन्मबन्धविनिर्मुक्ताः पदं गच्छन्त्यनामयम्
2.52a यदा ते मोहकलिलं बुद्धिर्व्यतितरिष्यति
2.52b तदा गन्तासि निर्वेदं श्रोतव्यस्य श्रुतस्य च
2.53a श्रुतिविप्रतिपन्ना ते यदा स्थास्यति निश्चला
2.53b समाधावचला बुद्धिस्तदा योगम् अवाप्स्यसि
2.54 अर्जुन उवाच
2.54a स्थितप्रज्ञस्य का भाषा समाधिस्थस्य केशव
2.54b स्थितधीः किं प्रभाषेत किम् आसीत व्रजेत किम्
2.55a प्रजहाति यदा कामान् सर्वान् पार्थ मनोगतान्
2.55b आत्मन्येवात्मना तुष्टः स्थितप्रज्ञस्तदोच्यते
2.56a दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः
2.56b वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते
2.57a यः सर्वत्रानभिस्नेहस्तत् तत् प्राप्य शुभाशुभम्
2.57b नाभिनन्दति न द्वेष्टि तस्य प्रज्ञा प्रतिष्ठिता
2.58a यदा संहरते चायं कूर्मोऽङ्गानीव सर्वशः
2.58b इन्द्रियाणीन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता
2.59a विषया विनिवर्तन्ते निराहारस्य देहिनः
2.59b रसवर्जं रसोऽप्यस्य परं दृष्ट्वा निवर्तते
2.60a यततो ह्यपि कौन्तेय पुरुषस्य विपश्चितः
2.60b इन्द्रियाणि प्रमाथीनि हरन्ति प्रसभं मनः
2.61a तानि सर्वाणि संयम्य युक्त आसीत मत्परः
2.61b वशे हि यस्येन्द्रियाणि तस्य प्रज्ञा प्रतिष्ठिता
2.62a ध्यायतो विषयान् पुंसः सङ्गस्तेषूपजायते
2.62b सङ्गात् संजायते कामः कामात् क्रोधोऽभिजायते
2.63a क्रोधाद्भवति संमोहः संमोहात् स्मृतिविभ्रमः

2.63b स्मृतिभ्रंशाद्बुद्धिनाशो बुद्धिनाशात् प्रणश्यति
2.64a रागद्वेषवियुक्तैस्तु विषयान् इन्द्रियैश्चरन्
2.64b आत्मवश्यैर्विधेयात्मा प्रसादम् अधिगच्छति
2.65a प्रसादे सर्वदुःखानां हानिरस्योपजायते
2.65b प्रसन्नचेतसो ह्याशु बुद्धिः पर्यवतिष्ठते
2.66a नास्ति बुद्धिरयुक्तस्य न चायुक्तस्य भावना
2.66b न चाभावयतः शान्तिरशान्तस्य कुतः सुखम्
2.67a इन्द्रियाणां हि चरतां यन् मनोऽनुविधीयते
2.67b तदस्य हरति प्रज्ञां वायुर्नावम् इवाम्भसि
2.68a तस्माद्यस्य महाबाहो निगृहीतानि सर्वशः
2.68b इन्द्रियाणीन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता
2.69a या निशा सर्वभूतानां तस्यां जागर्ति संयमी
2.69b यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेः
2.70a आपूर्यमाणम् अचलप्रतिष्ठं समुद्रम् आपः प्रविशन्ति यद्वत्
2.70b तद्वत् कामा यं प्रविशन्ति सर्वे स शान्तिम् आप्नोति न कामकामी
2.71a विहाय कामान् यः सर्वान् पुमांश्चरति निःस्पृहः
2.71b निर्ममो निरहंकारः स शान्तिम् अधिगच्छति
2.72a एषा ब्राह्मी स्थितिः पार्थ नैनां प्राप्य विमुह्यति
2.72b स्थित्वास्याम् अन्तकालेऽपि ब्रह्मनिर्वाणम् ऋच्छति

# Chapter 3

# कर्मयोगः

3.a अर्जुन उवाच
3.1a ज्यायसी चेत् कर्मणस्ते मता बुद्धिर्जनार्दन
3.1b तत् किं कर्मणि घोरे मां नियोजयसि केशव
3.2a व्यामिश्रेणैव वाक्येन बुद्धिं मोहयसीव मे
3.2b तदेकं वद निश्चित्य येन श्रेयोऽहम् आप्नुयाम्
3.b श्रीभगवान् उवाच
3.3a लोकेऽस्मिन् द्विविधा निष्ठा पुरा प्रोक्ता मयानघ
3.3b ज्ञानयोगेन सांख्यानां कर्मयोगेन योगिनाम्
3.4a न कर्मणाम् अनारम्भान् नैष्कर्म्यं पुरुषोऽश्नुते
3.4b न च संन्यसनादेव सिद्धिं समधिगच्छति
3.5a न हि कश्चित् क्षणम् अपि जातु तिष्ठत्यकर्मकृत्
3.5b कार्यते ह्यवशः कर्म सर्वः प्रकृतिजैर्गुणैः
3.6a कर्मेन्द्रियाणि संयम्य य आस्ते मनसा स्मरन्
3.6b इन्द्रियार्थान् विमूढात्मा मिथ्याचारः स उच्यते
3.7a यस्त्विन्द्रियाणि मनसा नियम्यारभतेऽर्जुन
3.7b कर्मेन्द्रियैः कर्मयोगम् असक्तः स विशिष्यते
3.8a नियतं कुरु कर्म त्वं कर्म ज्यायो ह्यकर्मणः
3.8b शरीरयात्रापि च ते न प्रसिध्येदकर्मणः
3.9a यज्ञार्थात् कर्मणोऽन्यत्र लोकोऽयं कर्मबन्धनः
3.9b तदर्थं कर्म कौन्तेय मुक्तसङ्गः समाचर
3.10a सहयज्ञाः प्रजाः सृष्ट्वा पुरोवाच प्रजापतिः
3.10b अनेन प्रसविष्यध्वम् एष वोऽस्त्विष्टकामधुक्
3.11a देवान् भावयतानेन ते देवा भावयन्तु वः

3.11b परस्परं भावयन्तः श्रेयः परम् अवाप्स्यथ
3.12a इष्टान् भोगान् हि वो देवा दास्यन्ते यज्ञभाविताः
3.12b तैर्दत्तान् अप्रदायैभ्यो यो भुङ्क्ते स्तेन एव सः
3.13a यज्ञशिष्टाशिनः सन्तो मुच्यन्ते सर्वकिल्बिषैः
3.13b भुञ्जते ते त्वघं पापा ये पचन्त्यात्मकारणात्
3.14a अन्नाद्भवन्ति भूतानि पर्जन्यादन्नसंभवः
3.14b यज्ञाद्भवति पर्जन्यो यज्ञः कर्मसमुद्भवः
3.15a कर्म ब्रह्मोद्भवं विद्धि ब्रह्माक्षरसमुद्भवम्
3.15b तस्मात् सर्वगतं ब्रह्म नित्यं यज्ञे प्रतिष्ठितम्
3.16a एवं प्रवर्तितं चक्रं नानुवर्तयतीह यः
3.16b अघायुरिन्द्रियारामो मोघं पार्थ स जीवति
3.17a यस्त्वात्मरतिरेव स्यादात्मतृप्तश्च मानवः
3.17b आत्मन्येव च संतुष्टस्तस्य कार्यं न विद्यते
3.18a नैव तस्य कृतेनार्थो नाकृतेनेह कश्चन
3.18b न चास्य सर्वभूतेषु कश्चिदर्थव्यपाश्रयः
3.19a तस्मादसक्तः सततं कार्यं कर्म समाचर
3.19b असक्तो ह्याचरन् कर्म परम् आप्नोति पूरुषः
3.20a कर्मणैव हि संसिद्धिम् आस्थिता जनकादयः
3.20b लोकसंग्रहम् एवापि संपश्यन् कर्तुम् अर्हसि
3.21a यद्यदाचरति श्रेष्ठस्तत् तदेवेतरो जनः
3.21b स यत् प्रमाणं कुरुते लोकस्तदनुवर्तते
3.22a न मे पार्थास्ति कर्तव्यं त्रिषु लोकेषु किं चन
3.22b नानवाप्तम् अवाप्तव्यं वर्त एव च कर्मणि
3.23a यदि ह्यहं न वर्तेयं जातु कर्मण्यतन्द्रितः
3.23b मम वर्त्मानुवर्तन्ते मनुष्याः पार्थ सर्वशः
3.24a उत्सीदेयुरिमे लोका न कुर्यां कर्म चेदहम्
3.24b संकरस्य च कर्ता स्याम् उपहन्याम् इमाः प्रजाः
3.25a सक्ताः कर्मण्यविद्वांसो यथा कुर्वन्ति भारत
3.25b कुर्याद्विद्वांस्तथासक्तश्चिकीर्षुर्लोकसंग्रहम्
3.26a न बुद्धिभेदं जनयेदज्ञानां कर्मसङ्गिनाम्
3.26b जोषयेत् सर्वकर्माणि विद्वान् युक्तः समाचरन्
3.27a प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः
3.27b अहंकारविमूढात्मा कर्ताहम् इति मन्यते
3.28a तत्त्ववित् तु महाबाहो गुणकर्मविभागयोः
3.28b गुणा गुणेषु वर्तन्त इति मत्वा न सज्जते
3.29a प्रकृतेर्गुणसंमूढाः सज्जन्ते गुणकर्मसु

3.29b तान् अकृत्स्नविदो मन्दान् कृत्स्नविन् न विचालयेत्
3.30a मयि सर्वाणि कर्माणि संन्यस्याध्यात्मचेतसा
3.30b निराशीर्निर्ममो भूत्वा युध्यस्व विगतज्वरः
3.31a ये मे मतम् इदं नित्यम् अनुतिष्ठन्ति मानवाः
3.31b श्रद्धावन्तोऽनसूयन्तो मुच्यन्ते तेऽपि कर्मभिः
3.32a ये त्वेतदभ्यसूयन्तो नानुतिष्ठन्ति मे मतम्
3.32b सर्वज्ञानविमूढांस्तान् विद्धि नष्टान् अचेतसः
3.33a सदृशं चेष्टते स्वस्याः प्रकृतेर्ज्ञानवान् अपि
3.33b प्रकृतिं यान्ति भूतानि निग्रहः किं करिष्यति
3.34a इन्द्रियस्येन्द्रियस्यार्थे रागद्वेषौ व्यवस्थितौ
3.34b तयोर्न वशम् आगच्छेत् तौ ह्यस्य परिपन्थिनौ
3.35a श्रेयान् स्वधर्मो विगुणः परधर्मात् स्वनुष्ठितात्
3.35b स्वधर्मे निधनं श्रेयः परधर्मो भयावहः
3.36 अर्जुन उवाच
3.36a अथ केन प्रयुक्तोऽयं पापं चरति पूरुषः
3.36b अनिच्छन्न् अपि वार्ष्णेय बलादिव नियोजितः
3.37 श्रीभगवान् उवाच
3.37a काम एष क्रोध एष रजोगुणसमुद्भवः
3.37b महाशनो महापाप्मा विद्ध्येनम् इह वैरिणम्
3.38a धूमेनाव्रियते वह्निर्यथादर्शो मलेन च
3.38b यथोल्बेनावृतो गर्भस्तथा तेनेदम् आवृतम्
3.39a आवृतं ज्ञानम् एतेन ज्ञानिनो नित्यवैरिणा
3.39b कामरूपेण कौन्तेय दुष्पूरेणानलेन च
3.40a इन्द्रियाणि मनो बुद्धिरस्याधिष्ठानम् उच्यते
3.40b एतैर्विमोहयत्येष ज्ञानम् आवृत्य देहिनम्
3.41a तस्मात् त्वम् इन्द्रियाण्यादौ नियम्य भरतर्षभ
3.41b पाप्मानं प्रजहि ह्येनं ज्ञानविज्ञाननाशनम्
3.42a इन्द्रियाणि पराण्याहुरिन्द्रियेभ्यः परं मनः
3.42b मनसस्तु परा बुद्धिर्यो बुद्धेः परतस्तु सः
3.43a एवं बुद्धेः परं बुद्ध्वा संस्तभ्यात्मानम् आत्मना
3.43b जहि शत्रुं महाबाहो कामरूपं दुरासदम्

# Chapter 4

# ज्ञानविभागयोगः

4.a श्रीभगवान् उवाच
4.1a इमं विवस्वते योगं प्रोक्तवान् अहम् अव्ययम्
4.1b विवस्वान् मनवे प्राह मनुरिक्ष्वाकवेऽब्रवीत्
4.2a एवं परम्पराप्राप्तम् इमं राजर्षयो विदुः
4.2b स कालेनेह महता योगो नष्टः परंतप
4.3a स एवायं मया तेऽद्य योगः प्रोक्तः पुरातनः
4.3b भक्तोऽसि मे सखा चेति रहस्यं ह्येतदुत्तमम्
4.4 अर्जुन उवाच
4.4a अपरं भवतो जन्म परं जन्म विवस्वतः
4.4b कथम् एतद्विजानीयां त्वम् आदौ प्रोक्तवान् इति
4.5 श्रीभगवान् उवाच
4.5a बहूनि मे व्यतीतानि जन्मानि तव चार्जुन
4.5b तान्यहं वेद सर्वाणि न त्वं वेत्थ परंतप
4.6a अजोऽपि सन्न् अव्ययात्मा भूतानाम् ईश्वरोऽपि सन्
4.6b प्रकृतिं स्वाम् अधिष्ठाय संभवाम्यात्ममायया
4.7a यदा यदा हि धर्मस्य ग्लानिर्भवति भारत
4.7b अभ्युत्थानम् अधर्मस्य तदात्मानं सृजाम्यहम्
4.8a परित्राणाय साधूनां विनाशाय च दुष्कृताम्
4.8b धर्मसंस्थापनार्थाय संभवामि युगे युगे
4.9a जन्म कर्म च मे दिव्यम् एवं यो वेत्ति तत्त्वतः
4.9b त्यक्त्वा देहं पुनर्जन्म नैति माम् एति सोऽर्जुन
4.10a वीतरागभयक्रोधा मन्मया माम् उपाश्रिताः

4.10b बहवो ज्ञानतपसा पूता मद्भावम् आगताः
4.11a ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम्
4.11b मम वर्त्मानुवर्तन्ते मनुष्याः पार्थ सर्वशः
4.12a काङ्क्षन्तः कर्मणां सिद्धिं यजन्त इह देवताः
4.12b क्षिप्रं हि मानुषे लोके सिद्धिर्भवति कर्मजा
4.13a चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः
4.13b तस्य कर्तारम् अपि मां विद्ध्यकर्तारम् अव्ययम्
4.14a न मां कर्माणि लिम्पन्ति न मे कर्मफले स्पृहा
4.14b इति मां योऽभिजानाति कर्मभिर्न स बध्यते
4.15a एवं ज्ञात्वा कृतं कर्म पूर्वैरपि मुमुक्षुभिः
4.15b कुरु कर्मैव तस्मात् त्वं पूर्वैः पूर्वतरं कृतम्
4.16a किं कर्म किमकर्मेति कवयोऽप्यत्र मोहिताः
4.16b तत् ते कर्म प्रवक्ष्यामि यज् ज्ञात्वा मोक्ष्यसेऽशुभात्
4.17a कर्मणो ह्यपि बोद्धव्यं बोद्धव्यं च विकर्मणः
4.17b अकर्मणश्च बोद्धव्यं गहना कर्मणो गतिः
4.18a कर्मण्यकर्म यः पश्येदकर्मणि च कर्म यः
4.18b स बुद्धिमान् मनुष्येषु स युक्तः कृत्स्नकर्मकृत्
4.19a यस्य सर्वे समारम्भाः कामसंकल्पवर्जिताः
4.19b ज्ञानाग्निदग्धकर्माणं तम् आहुः पण्डितं बुधाः
4.20a त्यक्त्वा कर्मफलासङ्गं नित्यतृप्तो निराश्रयः
4.20b कर्मण्यभिप्रवृत्तोऽपि नैव किं चित् करोति सः
4.21a निराशीर्यतचित्तात्मा त्यक्तसर्वपरिग्रहः
4.21b शारीरं केवलं कर्म कुर्वन् नाप्नोति किल्बिषम्
4.22a यदृच्छालाभसंतुष्टो द्वन्द्वातीतो विमत्सरः
4.22b समः सिद्धावसिद्धौ च कृत्वापि न निबध्यते
4.23a गतसङ्गस्य मुक्तस्य ज्ञानावस्थितचेतसः
4.23b यज्ञायाचरतः कर्म समग्रं प्रविलीयते
4.24a ब्रह्मार्पणं ब्रह्म हविर्ब्रह्माग्नौ ब्रह्मणा हुतम्
4.24b ब्रह्मैव तेन गन्तव्यं ब्रह्मकर्मसमाधिना
4.25a दैवम् एवापरे यज्ञं योगिनः पर्युपासते
4.25b ब्रह्माग्नावपरे यज्ञं यज्ञेनैवोपजुह्वति
4.26a श्रोत्रादीनीन्द्रियाण्यन्ये संयमाग्निषु जुह्वति
4.26b शब्दादीन् विषयान् अन्य इन्द्रियाग्निषु जुह्वति
4.27a सर्वाणीन्द्रियकर्माणि प्राणकर्माणि चापरे
4.27b आत्मसंयमयोगाग्नौ जुह्वति ज्ञानदीपिते
4.28a द्रव्ययज्ञास्तपोयज्ञा योगयज्ञास्तथापरे

4.28b स्वाध्यायज्ञानयज्ञाश्च यतयः संशितव्रताः
4.29a अपाने जुह्वति प्राणं प्राणेऽपानं तथापरे
4.29b प्राणापानगती रुद्ध्वा प्राणायामपरायणाः
4.30a अपरे नियताहाराः प्राणान् प्राणेषु जुह्वति
4.30b सर्वेऽप्येते यज्ञविदो यज्ञक्षपितकल्मषाः
4.31a यज्ञशिष्टामृतभुजो यान्ति ब्रह्म सनातनम्
4.31b नायं लोकोऽस्त्ययज्ञस्य कुतोऽन्यः कुरुसत्तम
4.32a एवं बहुविधा यज्ञा वितता ब्रह्मणो मुखे
4.32b कर्मजान् विद्धि तान् सर्वान् एवं ज्ञात्वा विमोक्ष्यसे
4.33a श्रेयान् द्रव्यमयाद्यज्ञाज् ज्ञानयज्ञः परंतप
4.33b सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते
4.34a तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया
4.34b उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः
4.35a यज् ज्ञात्वा न पुनर्मोहम् एवं यास्यसि पाण्डव
4.35b येन भूतान्यशेषेण द्रक्ष्यस्यात्मन्यथो मयि
4.36a अपि चेदसि पापेभ्यः सर्वेभ्यः पापकृत्तमः
4.36b सर्वं ज्ञानप्लवेनैव वृजिनं संतरिष्यसि
4.37a यथैधांसि समिद्धोऽग्निर्भस्मसात् कुरुतेऽर्जुन
4.37b ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुते तथा
4.38a न हि ज्ञानेन सदृशं पवित्रम् इह विद्यते
4.38b तत् स्वयं योगसंसिद्धः कालेनात्मनि विन्दति
4.39a श्रद्धावाꣳल् लभते ज्ञानं तत्परः संयतेन्द्रियः
4.39b ज्ञानं लब्ध्वा परां शान्तिम् अचिरेणाधिगच्छति
4.40a अज्ञश्चाश्रद्दधानश्च संशयात्मा विनश्यति
4.40b नायं लोकोऽस्ति न परो न सुखं संशयात्मनः
4.41a योगसंन्यस्तकर्माणं ज्ञानसंछिन्नसंशयम्
4.41b आत्मवन्तं न कर्माणि निबध्नन्ति धनंजय
4.42a तस्मादज्ञानसंभूतं हृत्स्थं ज्ञानासिनात्मनः
4.42b छित्त्वैनं संशयं योगम् आतिष्ठोत्तिष्ठ भारत

# Chapter 5

# कर्मसन्न्यासयोगः

5.a अर्जुन उवाच
5.1a संन्यासं कर्मणां कृष्ण पुनर्योगं च शंससि
5.1b यच्छ्रेय एतयोरेकं तन् मे ब्रूहि सुनिश्चितम्
5.2 श्रीभगवान् उवाच
5.2a संन्यासः कर्मयोगश्च निःश्रेयसकरावुभौ
5.2b तयोस्तु कर्मसंन्यासात् कर्मयोगो विशिष्यते
5.3a ज्ञेयः स नित्यसंन्यासी यो न द्वेष्टि न काङ्क्षति
5.3b निर्द्वन्द्वो हि महाबाहो सुखं बन्धात् प्रमुच्यते
5.4a सांख्ययोगौ पृथग् बालाः प्रवदन्ति न पण्डिताः
5.4b एकम् अप्यास्थितः सम्यग् उभयोर्विन्दते फलम्
5.5a यत् सांख्यैः प्राप्यते स्थानं तद्योगैरपि गम्यते
5.5b एकं सांख्यं च योगं च यः पश्यति स पश्यति
5.6a संन्यासस्तु महाबाहो दुःखम् आप्तुम् अयोगतः
5.6b योगयुक्तो मुनिर्ब्रह्म नचिरेणाधिगच्छति
5.7a योगयुक्तो विशुद्धात्मा विजितात्मा जितेन्द्रियः
5.7b सर्वभूतात्मभूतात्मा कुर्वन्न् अपि न लिप्यते
5.8a नैव किं चित् करोमीति युक्तो मन्येत तत्त्ववित्
5.8b पश्यञ् शृण्वन् स्पृशञ् जिघ्रन्न् अश्नन् गच्छन् स्वपञ् श्वसन्
5.9a प्रलपन् विसृजन् गृह्णन्न् उन्मिषन् निमिषन्न् अपि
5.9b इन्द्रियाणीन्द्रियार्थेषु वर्तन्त इति धारयन्
5.10a ब्रह्मण्याधाय कर्माणि सङ्गं त्यक्त्वा करोति यः
5.10b लिप्यते न स पापेन पद्मपत्रम् इवाम्भसा

5.11a कायेन मनसा बुद्ध्या केवलैरिन्द्रियैरपि
5.11b योगिनः कर्म कुर्वन्ति सङ्गं त्यक्त्वात्मशुद्धये
5.12a युक्तः कर्मफलं त्यक्त्वा शान्तिम् आप्नोति नैष्ठिकीम्
5.12b अयुक्तः कामकारेण फले सक्तो निबध्यते
5.13a सर्वकर्माणि मनसा संन्यस्यास्ते सुखं वशी
5.13b नवद्वारे पुरे देही नैव कुर्वन् न कारयन्
5.14a न कर्तृत्वं न कर्माणि लोकस्य सृजति प्रभुः
5.14b न कर्मफलसंयोगं स्वभावस्तु प्रवर्तते
5.15a नादत्ते कस्य चित् पापं न चैव सुकृतं विभुः
5.15b अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः
5.16a ज्ञानेन तु तदज्ञानं येषां नाशितम् आत्मनः
5.16b तेषाम् आदित्यवज् ज्ञानं प्रकाशयति तत्परम्
5.17a तद्बुद्धयस्तदात्मानस्तन्निष्ठास्तत्परायणाः
5.17b गच्छन्त्यपुनरावृत्तिं ज्ञाननिर्धूतकल्मषाः
5.18a विद्याविनयसंपन्ने ब्राह्मणे गवि हस्तिनि
5.18b शुनि चैव श्वपाके च पण्डिताः समदर्शिनः
5.19a इहैव तैर्जितः सर्गो येषां साम्ये स्थितं मनः
5.19b निर्दोषं हि समं ब्रह्म तस्माद्ब्रह्मणि ते स्थिताः
5.20a न प्रहृष्येत् प्रियं प्राप्य नोद्विजेत् प्राप्य चाप्रियम्
5.20b स्थिरबुद्धिरसंमूढो ब्रह्मविद्ब्रह्मणि स्थितः
5.21a बाह्यस्पर्शेष्वसक्तात्मा विन्दत्यात्मनि यत् सुखम्
5.21b स ब्रह्मयोगयुक्तात्मा सुखम् अक्षयम् अश्नुते
5.22a ये हि संस्पर्शजा भोगा दुःखयोनय एव ते
5.22b आद्यन्तवन्तः कौन्तेय न तेषु रमते बुधः
5.23a शक्नोतीहैव यः सोढुं प्राक् शरीरविमोक्षणात्
5.23b कामक्रोधोद्भवं वेगं स युक्तः स सुखी नरः
5.24a योऽन्तःसुखोऽन्तरारामस्तथान्तर्ज्योतिरेव यः
5.24b स योगी ब्रह्मनिर्वाणं ब्रह्मभूतोऽधिगच्छति
5.25a लभन्ते ब्रह्मनिर्वाणम् ऋषयः क्षीणकल्मषाः
5.25b छिन्नद्वैधा यतात्मानः सर्वभूतहिते रताः
5.26a कामक्रोधवियुक्तानां यतीनां यतचेतसाम्
5.26b अभितो ब्रह्मनिर्वाणं वर्तते विदितात्मनाम्
5.27a स्पर्शान् कृत्वा बहिर्बाह्यांश्चक्षुश्चैवान्तरे भ्रुवोः
5.27b प्राणापानौ समौ कृत्वा नासाभ्यन्तरचारिणौ
5.28a यतेन्द्रियमनोबुद्धिर्मुनिर्मोक्षपरायणः
5.28b विगतेच्छाभयक्रोधो यः सदा मुक्त एव सः

5.29a भोक्तारं यज्ञतपसां सर्वलोकमहेश्वरम्
5.5b सुहृदं सर्वभूतानां ज्ञात्वा मां शान्तिम् ऋच्छति

# Chapter 6

# ध्यानयोगः

6.a श्रीभगवान् उवाच
6.1a अनाश्रितः कर्मफलं कार्यं कर्म करोति यः
6.1b स संन्यासी च योगी च न निरग्निर्न चाक्रियः
6.2a यं संन्यासम् इति प्राहुर्योगं तं विद्धि पाण्डव
6.2b न ह्यसंन्यस्तसंकल्पो योगी भवति कश्चन
6.3a आरुरुक्षोर्मुनेर्योगं कर्म कारणम् उच्यते
6.3b योगारूढस्य तस्यैव शमः कारणम् उच्यते
6.4a यदा हि नेन्द्रियार्थेषु न कर्मस्वनुषज्जते
6.4b सर्वसंकल्पसंन्यासी योगारूढस्तदोच्यते
6.5a उद्धरेदात्मनात्मानं नात्मानम् अवसादयेत्
6.5b आत्मैव ह्यात्मनो बन्धुरात्मैव रिपुरात्मनः
6.6a बन्धुरात्मात्मनस्तस्य येनात्मैवात्मना जितः
6.6b अनात्मनस्तु शत्रुत्वे वर्तेतात्मैव शत्रुवत्
6.7a जितात्मनः प्रशान्तस्य परमात्मा समाहितः
6.7b शीतोष्णसुखदुःखेषु तथा मानापमानयोः
6.8a ज्ञानविज्ञानतृप्तात्मा कूटस्थो विजितेन्द्रियः
6.8b युक्त इत्युच्यते योगी समलोष्टाश्मकाञ्चनः
6.9a सुहृन्मित्रार्युदासीनमध्यस्थद्वेष्यबन्धुषु
6.9b साधुष्वपि च पापेषु समबुद्धिर्विशिष्यते
6.10a योगी युञ्जीत सततम् आत्मानं रहसि स्थितः
6.10b एकाकी यतचित्तात्मा निराशीरपरिग्रहः
6.11a शुचौ देशे प्रतिष्ठाप्य स्थिरम् आसनम् आत्मनः
6.11b नात्युच्छ्रितं नातिनीचं चैलाजिनकुशोत्तरम्

6.12a तत्रैकाग्रं मनः कृत्वा यतचित्तेन्द्रियक्रियः
6.12b उपविश्यासने युञ्ज्याद्योगम् आत्मविशुद्धये
6.13a समं कायशिरोग्रीवं धारयन्न् अचलं स्थिरः
6.13b संप्रेक्ष्य नासिकाग्रं स्वं दिशश्चानवलोकयन्
6.14a प्रशान्तात्मा विगतभीर्ब्रह्मचारिव्रते स्थितः
6.14b मनः संयम्य मच्चित्तो युक्त आसीत मत्परः
6.15a युञ्जन्न् एवं सदात्मानं योगी नियतमानसः
6.15b शान्तिं निर्वाणपरमां मत्संस्थाम् अधिगच्छति
6.16a नात्यश्नतस्तु योगोऽस्ति न चैकान्तम् अनश्नतः
6.16b न चातिस्वप्नशीलस्य जाग्रतो नैव चार्जुन
6.17a युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु
6.17b युक्तस्वप्नावबोधस्य योगो भवति दुःखहा
6.18a यदा विनियतं चित्तम् आत्मन्येवावतिष्ठते
6.18b निःस्पृहः सर्वकामेभ्यो युक्त इत्युच्यते तदा
6.19a यथा दीपो निवातस्थो नेङ्गते सोपमा स्मृता
6.19b योगिनो यतचित्तस्य युञ्जतो योगम् आत्मनः
6.20a यत्रोपरमते चित्तं निरुद्धं योगसेवया
6.20b यत्र चैवात्मनात्मानं पश्यन्न् आत्मनि तुष्यति
6.21a सुखम् आत्यन्तिकं यत् तद्बुद्धिग्राह्यम् अतीन्द्रियम्
6.21b वेत्ति यत्र न चैवायं स्थितश्चलति तत्त्वतः
6.22a यं लब्ध्वा चापरं लाभं मन्यते नाधिकं ततः
6.22b यस्मिन् स्थितो न दुःखेन गुरुणापि विचाल्यते
6.23a तं विद्याद्दुःखसंयोगवियोगं योगसंज्ञितम्
6.23b स निश्चयेन योक्तव्यो योगोऽनिर्विण्णचेतसा
6.24a संकल्पप्रभवान् कामांस्त्यक्त्वा सर्वान् अशेषतः
6.24b मनसैवेन्द्रियग्रामं विनियम्य समन्ततः
6.25a शनैः शनैरुपरमेद्बुद्ध्या धृतिगृहीतया
6.25b आत्मसंस्थं मनः कृत्वा न किं चिदपि चिन्तयेत्
6.26a यतो यतो निश्चरति मनश्चञ्चलम् अस्थिरम्
6.26b ततस्ततो नियम्यैतदात्मन्येव वशं नयेत्
6.27a प्रशान्तमनसं ह्येनं योगिनं सुखम् उत्तमम्
6.27b उपैति शान्तरजसं ब्रह्मभूतम् अकल्मषम्
6.28a युञ्जन्न् एवं सदात्मानं योगी विगतकल्मषः
6.28b सुखेन ब्रह्मसंस्पर्शम् अत्यन्तं सुखम् अश्नुते
6.29a सर्वभूतस्थम् आत्मानं सर्वभूतानि चात्मनि
6.29b ईक्षते योगयुक्तात्मा सर्वत्र समदर्शनः

6.30a यो मां पश्यति सर्वत्र सर्वं च मयि पश्यति
6.30b तस्याहं न प्रणश्यामि स च मे न प्रणश्यति
6.31a सर्वभूतस्थितं यो मां भजत्येकत्वम् आस्थितः
6.31b सर्वथा वर्तमानोऽपि स योगी मयि वर्तते
6.32a आत्मौपम्येन सर्वत्र समं पश्यति योऽर्जुन
6.32b सुखं वा यदि वा दुःखं स योगी परमो मतः
6.3b अर्जुन उवाच
6.33a योऽयं योगस्त्वया प्रोक्तः साम्येन मधुसूदन
6.33b एतस्याहं न पश्यामि चञ्चलत्वात् स्थितिं स्थिराम्
6.34a चञ्चलं हि मनः कृष्ण प्रमाथि बलवद्दृढम्
6.34b तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम्
6.35 श्रीभगवान् उवाच
6.35a असंशयं महाबाहो मनो दुर्णिग्रहं चलम्
6.35b अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते
6.36a असंयतात्मना योगो दुष्प्राप इति मे मतिः
6.36b वश्यात्मना तु यतता शक्योऽवाप्तुम् उपायतः
6.37 अर्जुन उवाच
6.37a अयतिः श्रद्धयोपेतो योगाच्चलितमानसः
6.37b अप्राप्य योगसंसिद्धिं कां गतिं कृष्ण गच्छति
6.38a कच्चिन् नोभयविभ्रष्टश्छिन्नाभ्रम् इव नश्यति
6.38b अप्रतिष्ठो महाबाहो विमूढो ब्रह्मणः पथि
6.39a एतन् मे संशयं कृष्ण छेत्तुम् अर्हस्यशेषतः
6.39b त्वदन्यः संशयस्यास्य छेत्ता न ह्युपपद्यते
6.40 श्रीभगवान् उवाच
6.40a पार्थ नैवेह नामुत्र विनाशस्तस्य विद्यते
6.40b न हि कल्याणकृत् कश्चिद्दुर्गतिं तात गच्छति
6.41a प्राप्य पुण्यकृतां लोकान् उषित्वा शाश्वतीः समाः
6.41b शुचीनां श्रीमतां गेहे योगभ्रष्टोऽभिजायते
6.42a अथ वा योगिनाम् एव कुले भवति धीमताम्
6.42b एतद्धि दुर्लभतरं लोके जन्म यदीदृशम्
6.43a तत्र तं बुद्धिसंयोगं लभते पौर्वदेहिकम्
6.43b यतते च ततो भूयः संसिद्धौ कुरुनन्दन
6.44a पूर्वाभ्यासेन तेनैव ह्रियते ह्यवशोऽपि सः
6.44b जिज्ञासुरपि योगस्य शब्दब्रह्मातिवर्तते
6.45a प्रयत्नाद्यतमानस्तु योगी संशुद्धकिल्बिषः
6.45b अनेकजन्मसंसिद्धस्ततो याति परां गतिम्

6.46a तपस्विभ्योऽधिको योगी ज्ञानिभ्योऽपि मतोऽधिकः
6.46b कर्मिभ्यश्चाधिको योगी तस्माद्योगी भवार्जुन
6.47a योगिनाम् अपि सर्वेषां मद्गतेनान्तरात्मना
6.47b श्रद्धावान् भजते यो मां स मे युक्ततमो मतः

# Chapter 7

# विज्ञानयोगः

7.a श्रीभगवान् उवाच
7.1a मय्यासक्तमनाः पार्थ योगं युञ्जन् मदाश्रयः
7.1b असंशयं समग्रं मां यथा ज्ञास्यसि तच्छृणु
7.2a ज्ञानं तेऽहं सविज्ञानम् इदं वक्ष्याम्यशेषतः
7.2b यज् ज्ञात्वा नेह भूयोऽन्यज् ज्ञातव्यम् अवशिष्यते
7.3a मनुष्याणां सहस्रेषु कश्चिद्यतति सिद्धये
7.3b यतताम् अपि सिद्धानां कश्चिन् मां वेत्ति तत्त्वतः
7.4a भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च
7.4b अहंकार इतीयं मे भिन्ना प्रकृतिरष्टधा
7.5a अपरेयम् इतस्त्वन्यां प्रकृतिं विद्धि मे पराम्
7.5b जीवभूतां महाबाहो ययेदं धार्यते जगत्
7.6a एतद्योनीनि भूतानि सर्वाणीत्युपधारय
7.6b अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा
7.7a मत्तः परतरं नान्यत् किं चिदस्ति धनंजय
7.7b मयि सर्वम् इदं प्रोतं सूत्रे मणिगणा इव
7.8a रसोऽहम् अप्सु कौन्तेय प्रभास्मि शशिसूर्ययोः
7.8b प्रणवः सर्ववेदेषु शब्दः खे पौरुषं नृषु
7.9a पुण्यो गन्धः पृथिव्यां च तेजश्चास्मि विभावसौ
7.9b जीवनं सर्वभूतेषु तपश्चास्मि तपस्विषु
7.10a बीजं मां सर्वभूतानां विद्धि पार्थ सनातनम्
7.10b बुद्धिर्बुद्धिमताम् अस्मि तेजस्तेजस्विनाम् अहम्
7.11a बलं बलवतां चाहं कामरागविवर्जितम्

7.11b धर्माविरुद्धो भूतेषु कामोऽस्मि भरतर्षभ
7.12a ये चैव सात्त्विका भावा राजसास्तामसाश्च ये
7.12b मत्त एवेति तान् विद्धि न त्वहं तेषु ते मयि
7.13a त्रिभिर्गुणमयैर्भावैरेभिः सर्वम् इदं जगत्
7.13b मोहितं नाभिजानाति माम् एभ्यः परम् अव्ययम्
7.14a दैवी ह्येषा गुणमयी मम माया दुरत्यया
7.14b माम् एव ये प्रपद्यन्ते मायाम् एतां तरन्ति ते
7.15a न मां दुष्कृतिनो मूढाः प्रपद्यन्ते नराधमाः
7.15b माययापहृतज्ञाना आसुरं भावम् आश्रिताः
7.16a चतुर्विधा भजन्ते मां जनाः सुकृतिनोऽर्जुन
7.16b आर्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ
7.17a तेषां ज्ञानी नित्ययुक्त एकभक्तिर्विशिष्यते
7.17b प्रियो हि ज्ञानिनोऽत्यर्थम् अहं स च मम प्रियः
7.18a उदाराः सर्व एवैते ज्ञानी त्वात्मैव मे मतम्
7.18b आस्थितः स हि युक्तात्मा माम् एवानुत्तमां गतिम्
7.19a बहूनां जन्मनाम् अन्ते ज्ञानवान् मां प्रपद्यते
7.19b वासुदेवः सर्वम् इति स महात्मा सुदुर्लभः
7.20a कामैस्तैस्तैर्हृतज्ञानाः प्रपद्यन्तेऽन्यदेवताः
7.20b तं तं नियमम् आस्थाय प्रकृत्या नियताः स्वया
7.21a यो यो यां यां तनुं भक्तः श्रद्धयार्चितुम् इच्छति
7.21b तस्य तस्याचलां श्रद्धां ताम् एव विदधाम्यहम्
7.22a स तया श्रद्धया युक्तस्तस्या राधनम् ईहते
7.22b लभते च ततः कामान् मयैव विहितान् हि तान्
7.23a अन्तवत् तु फलं तेषां तद्भवत्यल्पमेधसाम्
7.23b देवान् देवयजो यान्ति मद्भक्ता यान्ति माम् अपि
7.24a अव्यक्तं व्यक्तिम् आपन्नं मन्यन्ते माम् अबुद्धयः
7.24b परं भावम् अजानन्तो ममाव्ययम् अनुत्तमम्
7.25a नाहं प्रकाशः सर्वस्य योगमायासमावृतः
7.25b मूढोऽयं नाभिजानाति लोको माम् अजम् अव्ययम्
7.26a वेदाहं समतीतानि वर्तमानानि चार्जुन
7.26b भविष्याणि च भूतानि मां तु वेद न कश्चन
7.27a इच्छाद्वेषसमुत्थेन द्वन्द्वमोहेन भारत
7.27b सर्वभूतानि संमोहं सर्गे यान्ति परंतप
7.28a येषां त्वन्तगतं पापं जनानां पुण्यकर्मणाम्
7.28b ते द्वन्द्वमोहनिर्मुक्ता भजन्ते मां दृढव्रताः
7.29a जरामरणमोक्षाय माम् आश्रित्य यतन्ति ये

7.29b ते ब्रह्म तद्विदुः कृत्स्नम् अध्यात्मं कर्म चाखिलम्
7.30a साधिभूताधिदैवं मां साधियज्ञं च ये विदुः
7.30b प्रयाणकालेऽपि च मां ते विदुर्युक्तचेतसः

# Chapter 8

# तारकब्रह्मयोगः

8.a अर्जुन उवाच
8.1a किं तद्ब्रह्म किम् अध्यात्मं किं कर्म पुरुषोत्तम
8.1b अधिभूतं च किं प्रोक्तम् अधिदैवं किम् उच्यते
8.2a अधियज्ञः कथं कोऽत्र देहेऽस्मिन् मधुसूदन
8.2b प्रयाणकाले च कथं ज्ञेयोऽसि नियतात्मभिः
8.b श्रीभगवान् उवाच
8.3a अक्षरं ब्रह्म परमं स्वभावोऽध्यात्मम् उच्यते
8.3b भूतभावोद्भवकरो विसर्गः कर्मसंज्ञितः
8.4a अधिभूतं क्षरो भावः पुरुषश्चाधिदैवतम्
8.4b अधियज्ञोऽहम् एवात्र देहे देहभृतां वर
8.5a अन्तकाले च माम् एव स्मरन् मुक्त्वा कलेवरम्
8.5b यः प्रयाति स मद्भावं याति नास्त्यत्र संशयः
8.6a यं यं वापि स्मरन् भावं त्यजत्यन्ते कलेवरम्
8.6b तं तम् एवैति कौन्तेय सदा तद्भावभावितः
8.7a तस्मात् सर्वेषु कालेषु माम् अनुस्मर युध्य च
8.7b मय्यर्पितमनोबुद्धिर्माम् एवैष्यस्यसंशयः
8.8a अभ्यासयोगयुक्तेन चेतसा नान्यगामिना
8.8b परमं पुरुषं दिव्यं याति पार्थानुचिन्तयन्
8.9a कविं पुराणम् अनुशासितारम् अणोरणीयांसम् अनुस्मरेद्यः
8.9b सर्वस्य धातारम् अचिन्त्यरूपम् आदित्यवर्णं तमसः परस्तात्
8.10a प्रयाणकाले मनसाचलेन भक्त्या युक्तो योगबलेन चैव
8.10b भ्रुवोर्मध्ये प्राणम् आवेश्य सम्यक् स तं परं पुरुषम् उपैति दिव्यम्

8.11a यदक्षरं वेदविदो वदन्ति विशन्ति यद्यतयो वीतरागाः
8.11b यदिच्छन्तो ब्रह्मचर्यं चरन्ति तत् ते पदं संग्रहेण प्रवक्ष्ये
8.12a सर्वद्वाराणि संयम्य मनो हृदि निरुध्य च
8.12b मूर्ध्न्याधायात्मनः प्राणम् आस्थितो योगधारणाम्
8.13a ओम् इत्येकाक्षरं ब्रह्म व्याहरन् माम् अनुस्मरन्
8.13b यः प्रयाति त्यजन् देहं स याति परमां गतिम्
8.14a अनन्यचेताः सततं यो मां स्मरति नित्यशः
8.14b तस्याहं सुलभः पार्थ नित्ययुक्तस्य योगिनः
8.15a माम् उपेत्य पुनर्जन्म दुःखालयम् अशाश्वतम्
8.15b नाप्नुवन्ति महात्मानः संसिद्धिं परमां गताः
8.16a आ ब्रह्मभुवनाल् लोकाः पुनरावर्तिनोऽर्जुन
8.16b माम् उपेत्य तु कौन्तेय पुनर्जन्म न विद्यते
8.17a सहस्रयुगपर्यन्तम् अहर्यद्ब्रह्मणो विदुः
8.17b रात्रिं युगसहस्रान्तां तेऽहोरात्रविदो जनाः
8.18a अव्यक्ताद्व्यक्तयः सर्वाः प्रभवन्त्यहरागमे
8.18b रात्र्यागमे प्रलीयन्ते तत्रैवाव्यक्तसंज्ञके
8.19a भूतग्रामः स एवायं भूत्वा भूत्वा प्रलीयते
8.19b रात्र्यागमेऽवशः पार्थ प्रभवत्यहरागमे
8.20a परस्तस्मात् तु भावोऽन्योऽव्यक्तोऽव्यक्तात् सनातनः
8.20b यः स सर्वेषु भूतेषु नश्यत्सु न विनश्यति
8.21a अव्यक्तोऽक्षर इत्युक्तस्तम् आहुः परमां गतिम्
8.21b यं प्राप्य न निवर्तन्ते तद्धाम परमं मम
8.22a पुरुषः स परः पार्थ भक्त्या लभ्यस्त्वनन्यया
8.22b यस्यान्तःस्थानि भूतानि येन सर्वम् इदं ततम्
8.23a यत्र काले त्वनावृत्तिम् आवृत्तिं चैव योगिनः
8.23b प्रयाता यान्ति तं कालं वक्ष्यामि भरतर्षभ
8.24a अग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणम्
8.24b तत्र प्रयाता गच्छन्ति ब्रह्म ब्रह्मविदो जनाः
8.25a धूमो रात्रिस्तथा कृष्णः षण्मासा दक्षिणायनम्
8.25b तत्र चान्द्रमसं ज्योतिर्योगी प्राप्य निवर्तते
8.26a शुक्लकृष्णे गती ह्येते जगतः शाश्वते मते
8.26b एकया यात्यनावृत्तिम् अन्ययावर्तते पुनः
8.27a नैते सृती पार्थ जानन् योगी मुह्यति कश्चन
8.27b तस्मात् सर्वेषु कालेषु योगयुक्तो भवार्जुन
8.28a वेदेषु यज्ञेषु तपःसु चैव दानेषु यत् पुण्यफलं प्रदिष्टम्
8.28b अत्येति तत् सर्वम् इदं विदित्वा योगी परं स्थानम् उपैति चाद्यम्

# Chapter 9

# राजगुह्ययोगः

9.a श्रीभगवान् उवाच
9.1a इदं तु ते गुह्यतमं प्रवक्ष्याम्यनसूयवे
9.1b ज्ञानं विज्ञानसहितं यज् ज्ञात्वा मोक्ष्यसेऽशुभात्
9.2a राजविद्या राजगुह्यं पवित्रम् इदम् उत्तमम्
9.2b प्रत्यक्षावगमं धर्म्यं सुसुखं कर्तुम् अव्ययम्
9.3a अश्रद्दधानाः पुरुषा धर्मस्यास्य परंतप
9.3b अप्राप्य मां निवर्तन्ते मृत्युसंसारवर्त्मनि
9.4a मया ततम् इदं सर्वं जगदव्यक्तमूर्तिना
9.4b मत्स्थानि सर्वभूतानि न चाहं तेष्ववस्थितः
9.5a न च मत्स्थानि भूतानि पश्य मे योगम् ऐश्वरम्
9.5b भूतभृन् न च भूतस्थो ममात्मा भूतभावनः
9.6a यथाकाशस्थितो नित्यं वायुः सर्वत्रगो महान्
9.6b तथा सर्वाणि भूतानि मत्स्थानीत्युपधारय
9.7a सर्वभूतानि कौन्तेय प्रकृतिं यान्ति मामिकाम्
9.7b कल्पक्षये पुनस्तानि कल्पादौ विसृजाम्यहम्
9.8a प्रकृतिं स्वाम् अवष्टभ्य विसृजामि पुनः पुनः
9.8b भूतग्रामम् इमं कृत्स्नम् अवशं प्रकृतेर्वशात्
9.9a न च मां तानि कर्माणि निबध्नन्ति धनंजय
9.9b उदासीनवदासीनम् असक्तं तेषु कर्मसु
9.10a मयाध्यक्षेण प्रकृतिः सूयते सचराचरम्
9.10b हेतुनानेन कौन्तेय जगद्विपरिवर्तते
9.11a अवजानन्ति मां मूढा मानुषीं तनुम् आश्रितम्

9.11b परं भावम् अजानन्तो मम भूतमहेश्वरम्
9.12a मोघाशा मोघकर्माणो मोघज्ञाना विचेतसः
9.12b राक्षसीम् आसुरीं चैव प्रकृतिं मोहिनीं श्रिताः
9.13a महात्मानस्तु मां पार्थ दैवीं प्रकृतिम् आश्रिताः
9.13b भजन्त्यनन्यमनसो ज्ञात्वा भूतादिम् अव्ययम्
9.14a सततं कीर्तयन्तो मां यतन्तश्च दृढव्रताः
9.14b नमस्यन्तश्च मां भक्त्या नित्ययुक्ता उपासते
9.15a ज्ञानयज्ञेन चाप्यन्ये यजन्तो माम् उपासते
9.15b एकत्वेन पृथक्त्वेन बहुधा विश्वतोमुखम्
9.16a अहं क्रतुरहं यज्ञः स्वधाहम् अहम् औषधम्
9.16b मन्त्रोऽहम् अहम् एवाज्यम् अहम् अग्निरहं हुतम्
9.17a पिताहम् अस्य जगतो माता धाता पितामहः
9.17b वेद्यं पवित्रम् ओंकार ऋक् साम यजुरेव च
9.18a गतिर्भर्ता प्रभुः साक्षी निवासः शरणं सुहृत्
9.18b प्रभवः प्रलयः स्थानं निधानं बीजम् अव्ययम्
9.19a तपाम्यहम् अहं वर्षं निगृह्णाम्युत्सृजामि च
9.19b अमृतं चैव मृत्युश्च सदसच्चाहम् अर्जुन
9.20a त्रैविद्या मां सोमपाः पूतपापा यज्ञैरिष्ट्वा स्वर्गतिं प्रार्थयन्ते
9.20b ते पुण्यम् आसाद्य सुरेन्द्रलोकम् अश्नन्ति दिव्यान् दिवि देवभोगान्
9.21a ते तं भुक्त्वा स्वर्गलोकं विशालं क्षीणे पुण्ये मर्त्यलोकं विशन्ति
9.21b एवं त्रयीधर्मम् अनुप्रपन्ना गतागतं कामकामा लभन्ते
9.22a अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते
9.22b तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम्
9.23a येऽप्यन्यदेवताभक्ता यजन्ते श्रद्धयान्विताः
9.23b तेऽपि माम् एव कौन्तेय यजन्त्यविधिपूर्वकम्
9.24a अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च
9.24b न तु माम् अभिजानन्ति तत्त्वेनातश्च्यवन्ति ते
9.25a यान्ति देवव्रता देवान् पितृन् यान्ति पितृव्रताः
9.25b भूतानि यान्ति भूतेज्या यान्ति मद्याजिनोऽपि माम्
9.26a पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति
9.26b तदहं भक्त्युपहृतम् अश्नामि प्रयतात्मनः
9.27a यत् करोषि यदश्नासि यज् जुहोषि ददासि यत्
9.27b यत् तपस्यसि कौन्तेय तत् कुरुष्व मदर्पणम्
9.28a शुभाशुभफलैरेवं मोक्ष्यसे कर्मबन्धनैः
9.28b संन्यासयोगयुक्तात्मा विमुक्तो माम् उपैष्यसि

9.29a समोऽहं सर्वभूतेषु न मे द्वेष्योऽस्ति न प्रियः
9.29b ये भजन्ति तु मां भक्त्या मयि ते तेषु चाप्यहम्
9.30a अपि चेत् सुदुराचारो भजते माम् अनन्यभाक्
9.30b साधुरेव स मन्तव्यः सम्यग् व्यवसितो हि सः
9.31a क्षिप्रं भवति धर्मात्मा शश्वच्छान्तिं निगच्छति
9.31b कौन्तेय प्रतिजानीहि न मे भक्तः प्रणश्यति
9.32a मां हि पार्थ व्यपाश्रित्य येऽपि स्युः पापयोनयः
9.32b स्त्रियो वैश्यास्तथा शूद्रास्तेऽपि यान्ति परां गतिम्
9.33a किं पुनर्ब्राह्मणाः पुण्या भक्ता राजर्षयस्तथा
9.33b अनित्यम् असुखं लोकम् इमं प्राप्य भजस्व माम्
9.34a मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु
9.34b माम् एवैष्यसि युक्त्वैवम् आत्मानं मत्परायणः

# Chapter 10

# विभूतियोगः

10.a श्रीभगवान् उवाच
10.1a भूय एव महाबाहो शृणु मे परमं वचः
10.1b यत् तेऽहं प्रीयमाणाय वक्ष्यामि हितकाम्यया
10.2a न मे विदुः सुरगणाः प्रभवं न महर्षयः
10.2b अहम् आदिर्हि देवानां महर्षीणां च सर्वशः
10.3a यो माम् अजम् अनादिं च वेत्ति लोकमहेश्वरम्
10.3b असंमूढः स मर्त्येषु सर्वपापैः प्रमुच्यते
10.4a बुद्धिर्ज्ञानम् असंमोहः क्षमा सत्यं दमः शमः
10.4b सुखं दुःखं भवोऽभावो भयं चाभयम् एव च
10.5a अहिंसा समता तुष्टिस्तपो दानं यशोऽयशः
10.5b भवन्ति भावा भूतानां मत्त एव पृथग्विधाः
10.6a महर्षयः सप्त पूर्वे चत्वारो मनवस्तथा
10.6b मद्भावा मानसा जाता येषां लोक इमाः प्रजाः
10.7a एतां विभूतिं योगं च मम यो वेत्ति तत्त्वतः
10.7b सोऽविकम्पेन योगेन युज्यते नात्र संशयः
10.8a अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्तते
10.8b इति मत्वा भजन्ते मां बुधा भावसमन्विताः
10.9a मच्चित्ता मद्गतप्राणा बोधयन्तः परस्परम्
10.9b कथयन्तश्च मां नित्यं तुष्यन्ति च रमन्ति च
10.10a तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम्
10.10b ददामि बुद्धियोगं तं येन माम् उपयान्ति ते
10.11a तेषाम् एवानुकम्पार्थम् अहम् अज्ञानजं तमः
10.11b नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वता

10.12 अर्जुन उवाच
10.12a परं ब्रह्म परं धाम पवित्रं परमं भवान्
10.12b पुरुषं शाश्वतं दिव्यम् आदिदेवम् अजं विभुम्
10.13a आहुस्त्वाम् ऋषयः सर्वे देवर्षिर्नारदस्तथा
10.13b असितो देवलो व्यासः स्वयं चैव ब्रवीषि मे
10.14a सर्वम् एतदृतं मन्ये यन् मां वदसि केशव
10.14b न हि ते भगवन् व्यक्तिं विदुर्देवा न दानवाः
10.15a स्वयम् एवात्मनात्मानं वेत्थ त्वं पुरुषोत्तम
10.15b भूतभावन भूतेश देवदेव जगत्पते
10.16a वक्तुम् अर्हस्यशेषेण दिव्या ह्यात्मविभूतयः
10.16b याभिर्विभूतिभिर्लोकान् इमांस्त्वं व्याप्य तिष्ठसि
10.17a कथं विद्याम् अहं योगिंस्त्वां सदा परिचिन्तयन्
10.17b केषु केषु च भावेषु चिन्त्योऽसि भगवन् मया
10.18a विस्तरेणात्मनो योगं विभूतिं च जनार्दन
10.18b भूयः कथय तृप्तिर्हि शृण्वतो नास्ति मेऽमृतम्
10.19 श्रीभगवान् उवाच
10.19a हन्त ते कथयिष्यामि दिव्या ह्यात्मविभूतयः
10.19b प्राधान्यतः कुरुश्रेष्ठ नास्त्यन्तो विस्तरस्य मे
10.20a अहम् आत्मा गुडाकेश सर्वभूताशयस्थितः
10.20b अहम् आदिश्च मध्यं च भूतानाम् अन्त एव च
10.21a आदित्यानाम् अहं विष्णुर्ज्योतिषां रविरंशुमान्
10.21b मरीचिर्मरुताम् अस्मि नक्षत्राणाम् अहं शशी
10.22a वेदानां सामवेदोऽस्मि देवानाम् अस्मि वासवः
10.22b इन्द्रियाणां मनश्चास्मि भूतानाम् अस्मि चेतना
10.23a रुद्राणां शंकरश्चास्मि वित्तेशो यक्षरक्षसाम्
10.23b वसूनां पावकश्चास्मि मेरुः शिखरिणाम् अहम्
10.24a पुरोधसां च मुख्यं मां विद्धि पार्थ बृहस्पतिम्
10.24b सेनानीनाम् अहं स्कन्दः सरसाम् अस्मि सागरः
10.25a महर्षीणां भृगुरहं गिराम् अस्म्येकम् अक्षरम्
10.25b यज्ञानां जपयज्ञोऽस्मि स्थावराणां हिमालयः
10.26a अश्वत्थः सर्ववृक्षाणां देवर्षीणां च नारदः
10.26b गन्धर्वाणां चित्ररथः सिद्धानां कपिलो मुनिः
10.27a उच्चैःश्रवसम् अश्वानां विद्धि माम् अमृतोद्भवम्
10.27b ऐरावतं गजेन्द्राणां नराणां च नराधिपम्
10.28a आयुधानाम् अहं वज्रं धेनूनाम् अस्मि कामधुक्

10.28b प्रजनश्चास्मि कन्दर्पः सर्पाणाम् अस्मि वासुकिः
10.29a अनन्तश्चास्मि नागानां वरुणो यादसाम् अहम्
10.29b पितृणाम् अर्यमा चास्मि यमः संयमताम् अहम्
10.30a प्रह्लादश्चास्मि दैत्यानां कालः कलयताम् अहम्
10.30b मृगाणां च मृगेन्द्रोऽहं वैनतेयश्च पक्षिणाम्
10.31a पवनः पवताम् अस्मि रामः शस्त्रभृताम् अहम्
10.31b झषाणां मकरश्चास्मि स्रोतसाम् अस्मि जाह्नवी
10.32a सर्गाणाम् आदिरन्तश्च मध्यं चैवाहम् अर्जुन
10.32b अध्यात्मविद्या विद्यानां वादः प्रवदताम् अहम्
10.33a अक्षराणाम् अकारोऽस्मि द्वन्द्वः सामासिकस्य च
10.33b अहम् एवाक्षयः कालो धाताहं विश्वतोमुखः
10.34a मृत्युः सर्वहरश्चाहम् उद्भवश्च भविष्यताम्
10.34b कीर्तिः श्रीर्वाक् च नारीणां स्मृतिर्मेधा धृतिः क्षमा
10.35a बृहत्साम तथा साम्नां गायत्री छन्दसाम् अहम्
10.35b मासानां मार्गशीर्षोऽहम् ऋतूनां कुसुमाकरः
10.36a द्यूतं छलयताम् अस्मि तेजस्तेजस्विनाम् अहम्
10.36b जयोऽस्मि व्यवसायोऽस्मि सत्त्वं सत्त्ववताम् अहम्
10.37a वृष्णीनां वासुदेवोऽस्मि पाण्डवानां धनंजयः
10.37b मुनीनाम् अप्यहं व्यासः कवीनाम् उशना कविः
10.38a दण्डो दमयताम् अस्मि नीतिरस्मि जिगीषताम्
10.38b मौनं चैवास्मि गुह्यानां ज्ञानं ज्ञानवताम् अहम्
10.39a यच्चापि सर्वभूतानां बीजं तदहम् अर्जुन
10.39b न तदस्ति विना यत् स्यान् मया भूतं चराचरम्
10.40a नान्तोऽस्ति मम दिव्यानां विभूतीनां परंतप
10.40b एष तूद्देशतः प्रोक्तो विभूतेर्विस्तरो मया
10.41a यद्यद्विभूतिमत् सत्त्वं श्रीमदूर्जितम् एव वा
10.41b तत् तदेवावगच्छ त्वं मम तेजोऽंशसंभवम्
10.42a अथ वा बहुनैतेन किं ज्ञातेन तवार्जुन
10.42b विष्टभ्याहम् इदं कृत्स्नम् एकांशेन स्थितो जगत्

# Chapter 11

# विश्वरूपदर्शनयोगः

11.a अर्जुन उवाच
11.1a मदनुग्रहाय परमं गुह्यम् अध्यात्मसंज्ञितम्
11.1b यत् त्वयोक्तं वचस्तेन मोहोऽयं विगतो मम
11.2a भवाप्ययौ हि भूतानां श्रुतौ विस्तरशो मया
11.2b त्वत्तः कमलपत्राक्ष माहात्म्यम् अपि चाव्ययम्
11.3a एवम् एतद्यथात्थ त्वम् आत्मानं परमेश्वर
11.3b द्रष्टुम् इच्छामि ते रूपम् ऐश्वरं पुरुषोत्तम
11.4a मन्यसे यदि तच्छक्यं मया द्रष्टुम् इति प्रभो
11.4b योगेश्वर ततो मे त्वं दर्शयात्मानम् अव्ययम्
11.5 श्रीभगवान् उवाच
11.5a पश्य मे पार्थ रूपाणि शतशोऽथ सहस्रशः
11.5b नानाविधानि दिव्यानि नानावर्णाकृतीनि च
11.6a पश्यादित्यान् वसून् रुद्रान् अश्विनौ मरुतस्तथा
11.6b बहून्यदृष्टपूर्वाणि पश्याश्चर्याणि भारत
11.7a इहैकस्थं जगत् कृत्स्नं पश्याद्य सचराचरम्
11.7b मम देहे गुडाकेश यच्चान्यद्द्रष्टुम् इच्छसि
11.8a न तु मां शक्यसे द्रष्टुम् अनेनैव स्वचक्षुषा
11.8b दिव्यं ददामि ते चक्षुः पश्य मे योगम् ऐश्वरम्
11.9 संजय उवाच
11.9a एवम् उक्त्वा ततो राजन् महायोगेश्वरो हरिः
11.9b दर्शयाम् आस पार्थाय परमं रूपम् ऐश्वरम्
11.10a अनेकवक्त्रनयनम् अनेकाद्भुतदर्शनम्

11.10b अनेकदिव्याभरणं दिव्यानेकोद्यतायुधम्
11.11a दिव्यमाल्याम्बरधरं दिव्यगन्धानुलेपनम्
11.11b सर्वाश्चर्यमयं देवम् अनन्तं विश्वतोमुखम्
11.12a दिवि सूर्यसहस्रस्य भवेद्युगपदुत्थिता
11.12b यदि भाः सदृशी सा स्याद्भासस्तस्य महात्मनः
11.13a तत्रैकस्थं जगत् कृत्स्नं प्रविभक्तम् अनेकधा
11.13b अपश्यद्देवदेवस्य शरीरे पाण्डवस्तदा
11.14a ततः स विस्मयाविष्टो हृष्टरोमा धनंजयः
11.14b प्रणम्य शिरसा देवं कृताञ्जलिरभाषत
11.15 अर्जुन उवाच
11.15a पश्यामि देवांस्तव देव देहे सर्वांस्तथा भूतविशेषसंघान्
11.15b ब्रह्माणम् ईशं कमलासनस्थम् ऋषींश्च सर्वान् उरगांश्च दिव्यान्
11.16a अनेकबाहूदरवक्त्रनेत्रं पश्यामि त्वा सर्वतोऽनन्तरूपम्
11.16b नान्तं न मध्यं न पुनस्तवादिं पश्यामि विश्वेश्वर विश्वरूप
11.17a किरीटिनं गदिनं चक्रिणं च तेजोराशिं सर्वतो दीप्तिमन्तम्
11.17b पश्यामि त्वां दुर्निरीक्ष्यं समन्ताद् दीप्तानलार्कद्युतिम् अप्रमेयम्
11.18a त्वम् अक्षरं परमं वेदितव्यं त्वम् अस्य विश्वस्य परं निधानम्
11.18b त्वम् अव्ययः शाश्वतधर्मगोप्ता सनातनस्त्वं पुरुषो मतो मे
11.19a अनादिमध्यान्तम् अनन्तवीर्यम् अनन्तबाहुं शशिसूर्यनेत्रम्
11.19b पश्यामि त्वां दीप्तहुताशवक्त्रं स्वतेजसा विश्वम् इदं तपन्तम्
11.20a द्यावापृथिव्योरिदम् अन्तरं हि व्याप्तं त्वयैकेन दिशश्च सर्वाः
11.20b दृष्ट्वाद्भुतं रूपम् इदं तवोग्रं लोकत्रयं प्रव्यथितं महात्मन्
11.21a अमी हि त्वा सुरसंघा विशन्ति के चिद्भीताः प्राञ्जलयो गृणन्ति
11.21b स्वस्तीत्युक्त्वा महर्षिसिद्धसंघाः स्तुवन्ति त्वां स्तुतिभिः पुष्कलाभिः
11.22a रुद्रादित्या वसवो ये च साध्या विश्वेऽश्विनौ मरुतश्चोष्मपाश्च
11.22b गन्धर्वयक्षासुरसिद्धसंघा वीक्षन्ते त्वां विस्मिताश्चैव सर्वे
11.23a रूपं महत् ते बहुवक्त्रनेत्रं महाबाहो बहुबाहूरुपादम्
11.23b बहूदरं बहुदंष्ट्राकरालं दृष्ट्वा लोकाः प्रव्यथितास्तथाहम्
11.24a नभःस्पृशं दीप्तम् अनेकवर्णं व्यात्ताननं दीप्तविशालनेत्रम्
11.24b दृष्ट्वा हि त्वां प्रव्यथितान्तरात्मा धृतिं न विन्दामि शमं च विष्णो
11.25a दंष्ट्राकरालानि च ते मुखानि दृष्ट्वैव कालानलसंनिभानि
11.25b दिशो न जाने न लभे च शर्म प्रसीद देवेश जगन्निवास
11.26a अमी च त्वां धृतराष्ट्रस्य पुत्राः सर्वे सहैवावनिपालसंघैः
11.26b भीष्मो द्रोणः सूतपुत्रस्तथासौ सहास्मदीयैरपि योधमुख्यैः
11.27a वक्त्राणि ते त्वरमाणा विशन्ति दंष्ट्राकरालानि भयानकानि
11.27b के चिद्विलग्ना दशनान्तरेषु संदृश्यन्ते चूर्णितैरुत्तमाङ्गैः

11.28a यथा नदीनां बहवोऽम्बुवेगाः समुद्रम् एवाभिमुखा द्रवन्ति
11.28b तथा तवामी नरलोकवीरा विशन्ति वक्त्राण्यभिविज्वलन्ति
11.29a यथा प्रदीप्तं ज्वलनं पतंगा विशन्ति नाशाय समृद्धवेगाः
11.29b तथैव नाशाय विशन्ति लोकास् तवापि वक्त्राणि समृद्धवेगाः
11.30a लेलिह्यसे ग्रसमानः समन्ताल् लोकान् समग्रान् वदनैर्ज्वलद्भिः
11.30b तेजोभिरापूर्य जगत् समग्रं भासस्तवोग्राः प्रतपन्ति विष्णो
11.31a आख्याहि मे को भवान् उग्ररूपो नमोऽस्तु ते देववर प्रसीद
11.31b विज्ञातुम् इच्छामि भवन्तम् आद्यं न हि प्रजानामि तव प्रवृत्तिम्
11.32 श्रीभगवान् उवाच
11.32a कालोऽस्मि लोकक्षयकृत् प्रवृद्धो लोकान् समाहर्तुम् इह प्रवृत्तः
11.32b ऋतेऽपि त्वा न भविष्यन्ति सर्वे येऽवस्थिताः प्रत्यनीकेषु योधाः
11.33a तस्मात् त्वम् उत्तिष्ठ यशो लभस्व जित्वा शत्रून् भुङ्क्ष्व राज्यं समृद्धम्
11.33b मयैवैते निहताः पूर्वम् एव निमित्तमात्रं भव सव्यसाचिन्
11.34a द्रोणं च भीष्मं च जयद्रथं च कर्णं तथान्यान् अपि योधवीरान्
11.34b मया हतांस्त्वं जहि मा व्यथिष्ठा युध्यस्व जेतासि रणे सपत्नान्
11.35 संजय उवाच
11.35a एतच्छ्रुत्वा वचनं केशवस्य कृताञ्जलिर्वेपमानः किरीटी
11.35b नमस्कृत्वा भूय एवाह कृष्णं सगद्गदं भीतभीतः प्रणम्य
11.36 अर्जुन उवाच
11.36a स्थाने हृषीकेश तव प्रकीर्त्या जगत् प्रहृष्यत्यनुरज्यते च
11.36b रक्षांसि भीतानि दिशो द्रवन्ति सर्वे नमस्यन्ति च सिद्धसंघाः
11.37a कस्माच्च ते न नमेरन् महात्मन् गरीयसे ब्रह्मणोऽप्यादिकर्त्रे
11.37b अनन्त देवेश जगन्निवास त्वम् अक्षरं सदसत् तत्परं यत्
11.38a त्वम् आदिदेवः पुरुषः पुराणस् त्वम् अस्य विश्वस्य परं निधानम्
11.38b वेत्तासि वेद्यं च परं च धाम त्वया ततं विश्वम् अनन्तरूप
11.39a वायुर्यमोऽग्निर्वरुणः शशाङ्कः प्रजापतिस्त्वं प्रपितामहश्च
11.39b नमो नमस्तेऽस्तु सहस्रकृत्वः पुनश्च भूयोऽपि नमो नमस्ते
11.40a नमः पुरस्तादथ पृष्ठतस्ते नमोऽस्तु ते सर्वत एव सर्व
11.40b अनन्तवीर्यामितविक्रमस्त्वं सर्वं समाप्नोषि ततोऽसि सर्वः
11.41a सखेति मत्वा प्रसभं यदुक्तं हे कृष्ण हे यादव हे सखेति
11.41b अजानता महिमानं तवेदं मया प्रमादात् प्रणयेन वापि
11.42a यच्चावहासार्थम् असत्कृतोऽसि विहारशय्यासनभोजनेषु
11.42b एकोऽथ वाप्यच्युत तत्समक्षं तत् क्षामये त्वाम् अहम् अप्रमेयम्
11.43a पितासि लोकस्य चराचरस्य त्वम् अस्य पूज्यश्च गुरुर्गरीयान्
11.43b न त्वत्समोऽस्त्यभ्यधिकः कुतोऽन्यो लोकत्रयेऽप्यप्रतिमप्रभाव
11.44a तस्मात् प्रणम्य प्रणिधाय कायं प्रसादये त्वाम् अहम् ईशम् ईड्यम्

11.44b पितेव पुत्रस्य सखेव सख्युः प्रियः प्रियायार्हसि देव सोढुम्
11.45a अदृष्टपूर्वं हृषितोऽस्मि दृष्ट्वा भयेन च प्रव्यथितं मनो मे
11.45b तदेव मे दर्शय देव रूपं प्रसीद देवेश जगन्निवास
11.46a किरीटिनं गदिनं चक्रहस्तम् इच्छामि त्वां द्रष्टुम् अहं तथैव
11.46b तेनैव रूपेण चतुर्भुजेन सहस्रबाहो भव विश्वमूर्ते
11.47 श्रीभगवान् उवाच
11.47a मया प्रसन्नेन तवार्जुनेदं रूपं परं दर्शितम् आत्मयोगात्
11.47b तेजोमयं विश्वम् अनन्तम् आद्यं यन् मे त्वदन्येन न दृष्टपूर्वम्
11.48a न वेद यज्ञाध्ययनैर्न दानैर् न च क्रियाभिर्न तपोभिरुग्रैः
11.48b एवंरूपः शक्य अहं नृलोके द्रष्टुं त्वदन्येन कुरुप्रवीर
11.49a मा ते व्यथा मा च विमूढभावो दृष्ट्वा रूपं घोरम् ईदृङ् ममेदम्
11.49b व्यपेतभीः प्रीतमनाः पुनस्त्वं तदेव मे रूपम् इदं प्रपश्य
11.50 संजय उवाच
11.50a इत्यर्जुनं वासुदेवस्तथोक्त्वा स्वकं रूपं दर्शयाम् आस भूयः
11.50b आश्वासयाम् आस च भीतम् एनं भूत्वा पुनः सौम्यवपुर्महात्मा
11.5a अर्जुन उवाच
11.51a दृष्ट्वेदं मानुषं रूपं तव सौम्यं जनार्दन
11.51b इदानीम् अस्मि संवृत्तः सचेताः प्रकृतिं गतः
11.52 श्रीभगवान् उवाच
11.52a सुदुर्दर्शम् इदं रूपं दृष्टवान् असि यन् मम
11.52b देवा अप्यस्य रूपस्य नित्यं दर्शनकाङ्क्षिणः
11.53a नाहं वेदैर्न तपसा न दानेन न चेज्यया
11.53b शक्य एवंविधो द्रष्टुं दृष्टवान् असि मां यथा
11.54a भक्त्या त्वनन्यया शक्य अहम् एवंविधोऽर्जुन
11.54b ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परंतप
11.55a मत्कर्मकृन् मत्परमो मद्भक्तः सङ्गवर्जितः
11.55b निर्वैरः सर्वभूतेषु यः स माम् एति पाण्डव

# Chapter 12

# भक्तियोगः

12.a अर्जुन उवाच
12.1a एवं सततयुक्ता ये भक्तास्त्वां पर्युपासते
12.1b ये चाप्यक्षरम् अव्यक्तं तेषां के योगवित्तमाः
12.2 श्रीभगवान् उवाच
12.2a मय्यावेश्य मनो ये मां नित्ययुक्ता उपासते
12.2b श्रद्धया परयोपेतास्ते मे युक्ततमा मताः
12.3a ये त्वक्षरम् अनिर्देश्यम् अव्यक्तं पर्युपासते
12.3b सर्वत्रगम् अचिन्त्यं च कूटस्थम् अचलं ध्रुवम्
12.4a संनियम्येन्द्रियग्रामं सर्वत्र समबुद्धयः
12.4b ते प्राप्नुवन्ति माम् एव सर्वभूतहिते रताः
12.5a क्लेशोऽधिकतरस्तेषाम् अव्यक्तासक्तचेतसाम्
12.5b अव्यक्ता हि गतिर्दुःखं देहवद्भिरवाप्यते
12.6a ये तु सर्वाणि कर्माणि मयि संन्यस्य मत्पराः
12.6b अनन्येनैव योगेन मां ध्यायन्त उपासते
12.7a तेषाम् अहं समुद्धर्ता मृत्युसंसारसागरात्
12.7b भवामि नचिरात् पार्थ मय्यावेशितचेतसाम्
12.8a मय्येव मन आधत्स्व मयि बुद्धिं निवेशय
12.8b निवसिष्यसि मय्येव अत ऊर्ध्वं न संशयः
12.9a अथ चित्तं समाधातुं न शक्नोषि मयि स्थिरम्
12.9b अभ्यासयोगेन ततो माम् इच्छाप्तुं धनंजय
12.10a अभ्यासेऽप्यसमर्थोऽसि मत्कर्मपरमो भव
12.10b मदर्थम् अपि कर्माणि कुर्वन् सिद्धिम् अवाप्स्यसि
12.11a अथैतदप्यशक्तोऽसि कर्तुं मद्योगम् आश्रितः

12.11b सर्वकर्मफलत्यागं ततः कुरु यतात्मवान्
12.12a श्रेयो हि ज्ञानम् अभ्यासाज् ज्ञानाद्ध्यानं विशिष्यते
12.12b ध्यानात् कर्मफलत्यागस्त्यागाच्छान्तिरनन्तरम्
12.13a अद्वेष्टा सर्वभूतानां मैत्रः करुण एव च
12.13b निर्ममो निरहंकारः समदुःखसुखः क्षमी
12.14a संतुष्टः सततं योगी यतात्मा दृढनिश्चयः
12.14b मय्यर्पितमनोबुद्धिर्यो मद्भक्तः स मे प्रियः
12.15a यस्मान् नोद्विजते लोको लोकान् नोद्विजते च यः
12.15b हर्षामर्षभयोद्वेगैर्मुक्तो यः स च मे प्रियः
12.16a अनपेक्षः शुचिर्दक्ष उदासीनो गतव्यथः
12.16b सर्वारम्भपरित्यागी यो मद्भक्तः स मे प्रियः
12.17a यो न हृष्यति न द्वेष्टि न शोचति न काङ्क्षति
12.17b शुभाशुभपरित्यागी भक्तिमान् यः स मे प्रियः
12.18a समः शत्रौ च मित्रे च तथा मानापमानयोः
12.18b शीतोष्णसुखदुःखेषु समः सङ्गविवर्जितः
12.19a तुल्यनिन्दास्तुतिर्मौनी संतुष्टो येन केन चित्
12.19b अनिकेतः स्थिरमतिर्भक्तिमान् मे प्रियो नरः
12.20a ये तु धर्म्यामृतम् इदं यथोक्तं पर्युपासते
12.20b श्रद्दधाना मत्परमा भक्तास्तेऽतीव मे प्रियाः

# Chapter 13

# प्रकृतिपुरुषविवेकयोगः

13.a श्रीभगवान् उवाच
13.1a इदं शरीरं कौन्तेय क्षेत्रम् इत्यभिधीयते
13.1b एतद्यो वेत्ति तं प्राहुः क्षेत्रज्ञ इति तद्विदः
13.2a क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु भारत
13.2b क्षेत्रक्षेत्रज्ञयोर्ज्ञानं यत् तज् ज्ञानं मतं मम
13.3a तत् क्षेत्रं यच्च यादृक् च यद्विकारि यतश्च यत्
13.3b स च यो यत्प्रभावश्च तत् समासेन मे शृणु
13.4a ऋषिभिर्बहुधा गीतं छन्दोभिर्विविधैः पृथक्
13.4b ब्रह्मसूत्रपदैश्चैव हेतुमद्भिर्विनिश्चितैः
13.5a महाभूतान्यहंकारो बुद्धिरव्यक्तम् एव च
13.5b इन्द्रियाणि दशैकं च पञ्च चेन्द्रियगोचराः
13.6a इच्छा द्वेषः सुखं दुःखं संघातश्चेतना धृतिः
13.6b एतत् क्षेत्रं समासेन सविकारम् उदाहृतम्
13.7a अमानित्वम् अदम्भित्वम् अहिंसा क्षान्तिरार्जवम्
13.7b आचार्योपासनं शौचं स्थैर्यम् आत्मविनिग्रहः
13.8a इन्द्रियार्थेषु वैराग्यम् अनहंकार एव च
13.8b जन्ममृत्युजराव्याधिदुःखदोषानुदर्शनम्
13.9a असक्तिरनभिष्वङ्गः पुत्रदारगृहादिषु
13.9b नित्यं च समचित्तत्वम् इष्टानिष्टोपपत्तिषु
13.10a मयि चानन्ययोगेन भक्तिरव्यभिचारिणी
13.10b विविक्तदेशसेवित्वम् अरतिर्जनसंसदि
13.11a अध्यात्मज्ञाननित्यत्वं तत्त्वज्ञानार्थदर्शनम्

13.11b एतज् ज्ञानम् इति प्रोक्तम् अज्ञानं यदतोऽन्यथा
13.12a ज्ञेयं यत् तत् प्रवक्ष्यामि यज् ज्ञात्वामृतम् अश्नुते
13.12b अनादिमत् परं ब्रह्म न सत् तन् नासदुच्यते
13.13a सर्वतः पाणिपादं तत् सर्वतोऽक्षिशिरोमुखम्
13.13b सर्वतः श्रुतिमल् लोके सर्वम् आवृत्य तिष्ठति
13.14a सर्वेन्द्रियगुणाभासं सर्वेन्द्रियविवर्जितम्
13.14b असक्तं सर्वभृच्चैव निर्गुणं गुणभोक्तृच
13.15a बहिरन्तश्च भूतानाम् अचरं चरम् एव च
13.15b सूक्ष्मत्वात् तदविज्ञेयं दूरस्थं चान्तिके च तत्
13.16a अविभक्तं च भूतेषु विभक्तम् इव च स्थितम्
13.16b भूतभर्तृच तज् ज्ञेयं ग्रसिष्णु प्रभविष्णु च
13.17a ज्योतिषाम् अपि तज् ज्योतिस्तमसः परम् उच्यते
13.17b ज्ञानं ज्ञेयं ज्ञानगम्यं हृदि सर्वस्य विष्ठितम्
13.18a इति क्षेत्रं तथा ज्ञानं ज्ञेयं चोक्तं समासतः
13.18b मद्भक्त एतद्विज्ञाय मद्भावायोपपद्यते
13.19a प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि
13.19b विकारांश्च गुणांश्चैव विद्धि प्रकृतिसंभवान्
13.20a कार्यकारणकर्तृत्वे हेतुः प्रकृतिरुच्यते
13.20b पुरुषः सुखदुःखानां भोक्तृत्वे हेतुरुच्यते
13.21a पुरुषः प्रकृतिस्थो हि भुङ्क्ते प्रकृतिजान् गुणान्
13.21b कारणं गुणसङ्गोऽस्य सदसद्योनिजन्मसु
13.22a उपद्रष्टानुमन्ता च भर्ता भोक्ता महेश्वरः
13.22b परमात्मेति चाप्युक्तो देहेऽस्मिन् पुरुषः परः
13.23a य एवं वेत्ति पुरुषं प्रकृतिं च गुणैः सह
13.23b सर्वथा वर्तमानोऽपि न स भूयोऽभिजायते
13.24a ध्यानेनात्मनि पश्यन्ति के चिदात्मानम् आत्मना
13.24b अन्ये सांख्येन योगेन कर्मयोगेन चापरे
13.25a अन्ये त्वेवम् अजानन्तः श्रुत्वान्येभ्य उपासते
13.25b तेऽपि चातितरन्त्येव मृत्युं श्रुतिपरायणाः
13.26a यावत् संजायते किं चित् सत्त्वं स्थावरजङ्गमम्
13.26b क्षेत्रक्षेत्रज्ञसंयोगात् तद्विद्धि भरतर्षभ
13.27a समं सर्वेषु भूतेषु तिष्ठन्तं परमेश्वरम्
13.27b विनश्यत्स्वविनश्यन्तं यः पश्यति स पश्यति
13.28a समं पश्यन् हि सर्वत्र समवस्थितम् ईश्वरम्
13.28b न हिनस्त्यात्मनात्मानं ततो याति परां गतिम्
13.29a प्रकृत्यैव च कर्माणि क्रियमाणानि सर्वशः

13.29b यः पश्यति तथात्मानम् अकर्तारं स पश्यति
13.30a यदा भूतपृथग्भावम् एकस्थम् अनुपश्यति
13.30b तत एव च विस्तारं ब्रह्म संपद्यते तदा
13.31a अनादित्वान् निर्गुणत्वात् परमात्मायम् अव्ययः
13.31b शरीरस्थोऽपि कौन्तेय न करोति न लिप्यते
13.32a यथा सर्वगतं सौक्ष्म्यादाकाशं नोपलिप्यते
13.32b सर्वत्रावस्थितो देहे तथात्मा नोपलिप्यते
13.33a यथा प्रकाशयत्येकः कृत्स्नं लोकम् इमं रविः
13.33b क्षेत्रं क्षेत्री तथा कृत्स्नं प्रकाशयति भारत
13.34a क्षेत्रक्षेत्रज्ञयोरेवम् अन्तरं ज्ञानचक्षुषा
13.34b भूतप्रकृतिमोक्षं च ये विदुर्यान्ति ते परम्

# Chapter 14

# गुणत्रयविभागयोगः

14.a श्रीभगवान् उवाच
14.1a परं भूयः प्रवक्ष्यामि ज्ञानानां ज्ञानम् उत्तमम्
14.1b यज् ज्ञात्वा मुनयः सर्वे परां सिद्धिम् इतो गताः
14.2a इदं ज्ञानम् उपाश्रित्य मम साधर्म्यम् आगताः
14.2b सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति च
14.3a मम योनिर्महद्ब्रह्म तस्मिन् गर्भं दधाम्यहम्
14.3b संभवः सर्वभूतानां ततो भवति भारत
14.4a सर्वयोनिषु कौन्तेय मूर्तयः संभवन्ति याः
14.4b तासां ब्रह्म महद्योनिरहं बीजप्रदः पिता
14.5a सत्त्वं रजस्तम इति गुणाः प्रकृतिसंभवाः
14.5b निबध्नन्ति महाबाहो देहे देहिनम् अव्ययम्
14.6a तत्र सत्त्वं निर्मलत्वात् प्रकाशकम् अनामयम्
14.6b सुखसङ्गेन बध्नाति ज्ञानसङ्गेन चानघ
14.7a रजो रागात्मकं विद्धि तृष्णासङ्गसमुद्भवम्
14.7b तन् निबध्नाति कौन्तेय कर्मसङ्गेन देहिनम्
14.8a तमस्त्वज्ञानजं विद्धि मोहनं सर्वदेहिनाम्
14.8b प्रमादालस्यनिद्राभिस्तन् निबध्नाति भारत
14.9a सत्त्वं सुखे संजयति रजः कर्मणि भारत
14.9b ज्ञानम् आवृत्य तु तमः प्रमादे संजयत्युत
14.10a रजस्तमश्चाभिभूय सत्त्वं भवति भारत
14.10b रजः सत्त्वं तमश्चैव तमः सत्त्वं रजस्तथा
14.11a सर्वद्वारेषु देहेऽस्मिन् प्रकाश उपजायते

14.11b ज्ञानं यदा तदा विद्याद्विवृद्धं सत्त्वम् इत्युत
14.12a लोभः प्रवृत्तिरारम्भः कर्मणाम् अशमः स्पृहा
14.12b रजस्येतानि जायन्ते विवृद्धे भरतर्षभ
14.13a अप्रकाशोऽप्रवृत्तिश्च प्रमादो मोह एव च
14.13b तमस्येतानि जायन्ते विवृद्धे कुरुनन्दन
14.14a यदा सत्त्वे प्रवृद्धे तु प्रलयं याति देहभृत्
14.14b तदोत्तमविदां लोकान् अमलान् प्रतिपद्यते
14.15a रजसि प्रलयं गत्वा कर्मसङ्गिषु जायते
14.15b तथा प्रलीनस्तमसि मूढयोनिषु जायते
14.16a कर्मणः सुकृतस्याहुः सात्त्विकं निर्मलं फलम्
14.16b रजसस्तु फलं दुःखम् अज्ञानं तमसः फलम्
14.17a सत्त्वात् संजायते ज्ञानं रजसो लोभ एव च
14.17b प्रमादमोहौ तमसो भवतोऽज्ञानम् एव च
14.18a ऊर्ध्वं गच्छन्ति सत्त्वस्था मध्ये तिष्ठन्ति राजसाः
14.18b जघन्यगुणवृत्तस्था अधो गच्छन्ति तामसाः
14.19a नान्यं गुणेभ्यः कर्तारं यदा द्रष्टानुपश्यति
14.19b गुणेभ्यश्च परं वेत्ति मद्भावं सोऽधिगच्छति
14.20a गुणान् एतान् अतीत्य त्रीन् देही देहसमुद्भवान्
14.20b जन्ममृत्युजरादुःखैर्विमुक्तोऽमृतम् अश्नुते
14.2a अर्जुन उवाच
14.21a कैर्लिङ्गैस्त्रीन् गुणान् एतान् अतीतो भवति प्रभो
14.21b किमाचारः कथं चैतांस्त्रीन् गुणान् अतिवर्तते
14.22 श्रीभगवान् उवाच
14.22a प्रकाशं च प्रवृत्तिं च मोहम् एव च पाण्डव
14.22b न द्वेष्टि संप्रवृत्तानि न निवृत्तानि काङ्क्षति
14.23a उदासीनवदासीनो गुणैर्यो न विचाल्यते
14.23b गुणा वर्तन्त इत्येव योऽवतिष्ठति नेङ्गते
14.24a समदुःखसुखः स्वस्थः समलोष्टाश्मकाञ्चनः
14.24b तुल्यप्रियाप्रियो धीरस्तुल्यनिन्दात्मसंस्तुतिः
14.25a मानापमानयोस्तुल्यस्तुल्यो मित्रारिपक्षयोः
14.25b सर्वारम्भपरित्यागी गुणातीतः स उच्यते
14.26a मां च योऽव्यभिचारेण भक्तियोगेन सेवते
14.26b स गुणान् समतीत्यैतान् ब्रह्मभूयाय कल्पते
14.27a ब्रह्मणो हि प्रतिष्ठाहम् अमृतस्याव्ययस्य च
14.27b शाश्वतस्य च धर्मस्य सुखस्यैकान्तिकस्य च

# Chapter 15

# पुरुषोत्तमयोगः

15.a श्रीभगवान् उवाच
15.1a ऊर्ध्वमूलम् अधःशाखम् अश्वत्थं प्राहुरव्ययम्
15.1b छन्दांसि यस्य पर्णानि यस्तं वेद स वेदवित्
15.2a अधश्चोर्ध्वं प्रसृतास्तस्य शाखा गुणप्रवृद्धा विषयप्रवालाः
15.2b अधश्च मूलान्यनुसंततानि कर्मानुबन्धीनि मनुष्यलोके
15.3a न रूपम् अस्येह तथोपलभ्यते नान्तो न चादिर्न च संप्रतिष्ठा
15.3b अश्वत्थम् एनं सुविरूढमूलमसङ्गशस्त्रेण दृढेन छित्त्वा
15.4a ततः पदं तत्परिमार्गितव्यं यस्मिन् गता न निवर्तन्ति भूयः
15.4b तम् एव चाद्यं पुरुषं प्रपद्ये यतः प्रवृत्तिः प्रसृता पुराणी
15.5a निर्मानमोहा जितसङ्गदोषा अध्यात्मनित्या विनिवृत्तकामाः
15.5b द्वन्द्वैर्विमुक्ताः सुखदुःखसंज्ञैर्गच्छन्त्यमूढाः पदम् अव्ययं तत्
15.6a न तद्भासयते सूर्यो न शशाङ्को न पावकः
15.6b यद्गत्वा न निवर्तन्ते तद्धाम परमं मम
15.7a ममैवांशो जीवलोके जीवभूतः सनातनः
15.7b मनःषष्ठानीन्द्रियाणि प्रकृतिस्थानि कर्षति
15.8a शरीरं यदवाप्नोति यच्चाप्युत्क्रामतीश्वरः
15.8b गृहीत्वैतानि संयाति वायुर्गन्धान् इवाशयात्
15.9a श्रोत्रं चक्षुः स्पर्शनं च रसनं घ्राणम् एव च
15.9b अधिष्ठाय मनश्चायं विषयान् उपसेवते
15.10a उत्क्रामन्तं स्थितं वापि भुञ्जानं वा गुणान्वितम्
15.10b विमूढा नानुपश्यन्ति पश्यन्ति ज्ञानचक्षुषः
15.11a यतन्तो योगिनश्चैनं पश्यन्त्यात्मन्यवस्थितम्

15.11b यतन्तोऽप्यकृतात्मानो नैनं पश्यन्त्यचेतसः
15.12a यदादित्यगतं तेजो जगद्भासयतेऽखिलम्
15.12b यच्चन्द्रमसि यच्चाग्नौ तत् तेजो विद्धि मामकम्
15.13a गाम् आविश्य च भूतानि धारयाम्यहम् ओजसा
15.13b पुष्णामि चौषधीः सर्वाः सोमो भूत्वा रसात्मकः
15.14a अहं वैश्वानरो भूत्वा प्राणिनां देहम् आश्रितः
15.14b प्राणापानसमायुक्तः पचाम्यन्नं चतुर्विधम्
15.15a सर्वस्य चाहं हृदि संनिविष्टो मत्तः स्मृतिर्ज्ञानम् अपोहनं च
15.15b वेदैश्च सर्वैरहम् एव वेद्यो वेदान्तकृद्वेदविदेव चाहम्
15.16a द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च
15.16b क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते
15.17a उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः
15.17b यो लोकत्रयम् आविश्य बिभर्त्यव्यय ईश्वरः
15.18a यस्मात् क्षरम् अतीतोऽहम् अक्षरादपि चोत्तमः
15.18b अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः
15.19a यो माम् एवम् असंमूढो जानाति पुरुषोत्तमम्
15.19b स सर्वविद्भजति मां सर्वभावेन भारत
15.20a इति गुह्यतमं शास्त्रम् इदम् उक्तं मयानघ
15.20b एतद्बुद्ध्वा बुद्धिमान् स्यात् कृतकृत्यश्च भारत

# Chapter 16

# दैवासुरसम्पद्विभागयोगः

16.a श्रीभगवान् उवाच
16.1a अभयं सत्त्वसंशुद्धिर्ज्ञानयोगव्यवस्थितिः
16.1b दानं दमश्च यज्ञश्च स्वाध्यायस्तप आर्जवम्
16.2a अहिंसा सत्यम् अक्रोधस्त्यागः शान्तिरपैशुनम्
16.2b दया भूतेष्वलोलुप्त्वं मार्दवं ह्रीरचापलम्
16.3a तेजः क्षमा धृतिः शौचम् अद्रोहो नातिमानिता
16.3b भवन्ति संपदं दैवीम् अभिजातस्य भारत
16.4a दम्भो दर्पोऽतिमानश्च क्रोधः पारुष्यम् एव च
16.4b अज्ञानं चाभिजातस्य पार्थ संपदम् आसुरीम्
16.5a दैवी संपद्विमोक्षाय निबन्धायासुरी मता
16.5b मा शुचः संपदं दैवीम् अभिजातोऽसि पाण्डव
16.6a द्वौ भूतसर्गौ लोकेऽस्मिन् दैव आसुर एव च
16.6b दैवो विस्तरशः प्रोक्त आसुरं पार्थ मे शृणु
16.7a प्रवृत्तिं च निवृत्तिं च जना न विदुरासुराः
16.7b न शौचं नापि चाचारो न सत्यं तेषु विद्यते
16.8a असत्यम् अप्रतिष्ठं ते जगदाहुरनीश्वरम्
16.8b अपरस्परसंभूतं किम् अन्यत् कामहैतुकम्
16.9a एतां दृष्टिम् अवष्टभ्य नष्टात्मानोऽल्पबुद्धयः
16.9b प्रभवन्त्युग्रकर्माणः क्षयाय जगतोऽहिताः
16.10a कामम् आश्रित्य दुष्पूरं दम्भमानमदान्विताः
16.10b मोहाद्गृहीत्वासद्ग्राहान् प्रवर्तन्तेऽशुचिव्रताः
16.11a चिन्ताम् अपरिमेयां च प्रलयान्ताम् उपाश्रिताः

16.11b कामोपभोगपरमा एतावदिति निश्चिताः
16.12a आशापाशशतैर्बद्धाः कामक्रोधपरायणाः
16.12b ईहन्ते कामभोगार्थम् अन्यायेनार्थसंचयान्
16.13a इदम् अद्य मया लब्धम् इदं प्राप्स्ये मनोरथम्
16.13b इदम् अस्तीदम् अपि मे भविष्यति पुनर्धनम्
16.14a असौ मया हतः शत्रुर्हनिष्ये चापरान् अपि
16.14b ईश्वरोऽहम् अहं भोगी सिद्धोऽहं बलवान् सुखी
16.15a आढ्योऽभिजनवान् अस्मि कोऽन्योऽस्ति सदृशो मया
16.15b यक्ष्ये दास्यामि मोदिष्य इत्यज्ञानविमोहिताः
16.16a अनेकचित्तविभ्रान्ता मोहजालसमावृताः
16.16b प्रसक्ताः कामभोगेषु पतन्ति नरकेऽशुचौ
16.17a आत्मसंभाविताः स्तब्धा धनमानमदान्विताः
16.17b यजन्ते नामयज्ञैस्ते दम्भेनाविधिपूर्वकम्
16.18a अहंकारं बलं दर्पं कामं क्रोधं च संश्रिताः
16.18b माम् आत्मपरदेहेषु प्रद्विषन्तोऽभ्यसूयकाः
16.19a तान् अहं द्विषतः क्रूरान् संसारेषु नराधमान्
16.19b क्षिपाम्यजस्रम् अशुभान् आसुरीष्वेव योनिषु
16.20a आसुरीं योनिम् आपन्ना मूढा जन्मनि जन्मनि
16.20b माम् अप्राप्यैव कौन्तेय ततो यान्त्यधमां गतिम्
16.21a त्रिविधं नरकस्येदं द्वारं नाशनम् आत्मनः
16.21b कामः क्रोधस्तथा लोभस्तस्मादेतत् त्रयं त्यजेत्
16.22a एतैर्विमुक्तः कौन्तेय तमोद्वारैस्त्रिभिर्नरः
16.22b आचरत्यात्मनः श्रेयस्ततो याति परां गतिम्
16.23a यः शास्त्रविधिम् उत्सृज्य वर्तते कामकारतः
16.23b न स सिद्धिम् अवाप्नोति न सुखं न परां गतिम्
16.24a तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ
16.24b ज्ञात्वा शास्त्रविधानोक्तं कर्म कर्तुम् इहार्हसि

# Chapter 17

# श्रद्धात्रयविभागयोगः

17.a अर्जुन उवाच
17.1a ये शास्त्रविधिम् उत्सृज्य यजन्ते श्रद्धयान्विताः
17.1b तेषां निष्ठा तु का कृष्ण सत्त्वम् आहो रजस्तमः
17.2 श्रीभगवान् उवाच
17.2a त्रिविधा भवति श्रद्धा देहिनां सा स्वभावजा
17.2b सात्त्विकी राजसी चैव तामसी चेति तां शृणु
17.3a सत्त्वानुरूपा सर्वस्य श्रद्धा भवति भारत
17.3b श्रद्धामयोऽयं पुरुषो यो यच्छ्रद्धः स एव सः
17.4a यजन्ते सात्त्विका देवान् यक्षरक्षांसि राजसाः
17.4b प्रेतान् भूतगणांश्चान्ये यजन्ते तामसा जनाः
17.5a अशास्त्रविहितं घोरं तप्यन्ते ये तपो जनाः
17.5b दम्भाहंकारसंयुक्ताः कामरागबलान्विताः
17.6a कर्शयन्तः शरीरस्थं भूतग्रामम् अचेतसः
17.6b मां चैवान्तःशरीरस्थं तान् विद्ध्यासुरनिश्चयान्
17.7a आहारस्त्वपि सर्वस्य त्रिविधो भवति प्रियः
17.7b यज्ञस्तपस्तथा दानं तेषां भेदम् इमं शृणु
17.8a आयुःसत्त्वबलारोग्यसुखप्रीतिविवर्धनाः
17.8b रस्याः स्निग्धाः स्थिरा हृद्या आहाराः सात्त्विकप्रियाः
17.9a कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिनः
17.9b आहारा राजसस्येष्टा दुःखशोकामयप्रदाः
17.10a यातयामं गतरसं पूति पर्युषितं च यत्
17.10b उच्छिष्टम् अपि चामेध्यं भोजनं तामसप्रियम्
17.11a अफलाकाङ्क्षिभिर्यज्ञो विधिदृष्टो य इज्यते

17.11b यष्टव्यम् एवेति मनः समाधाय स सात्त्विकः
17.12a अभिसंधाय तु फलं दम्भार्थम् अपि चैव यत्
17.12b इज्यते भरतश्रेष्ठ तं यज्ञं विद्धि राजसम्
17.13a विधिहीनम् असृष्टान्नं मन्त्रहीनम् अदक्षिणम्
17.13b श्रद्धाविरहितं यज्ञं तामसं परिचक्षते
17.14a देवद्विजगुरुप्राज्ञपूजनं शौचम् आर्जवम्
17.14b ब्रह्मचर्यम् अहिंसा च शारीरं तप उच्यते
17.15a अनुद्वेगकरं वाक्यं सत्यं प्रियहितं च यत्
17.15b स्वाध्यायाभ्यसनं चैव वाङ्मयं तप उच्यते
17.16a मनःप्रसादः सौम्यत्वं मौनम् आत्मविनिग्रहः
17.16b भावसंशुद्धिरित्येतत् तपो मानसम् उच्यते
17.17a श्रद्धया परया तप्तं तपस्तत् त्रिविधं नरैः
17.17b अफलाकाङ्क्षिभिर्युक्तैः सात्त्विकं परिचक्षते
17.18a सत्कारमानपूजार्थं तपो दम्भेन चैव यत्
17.18b क्रियते तदिह प्रोक्तं राजसं चलम् अध्रुवम्
17.19a मूढग्राहेणात्मनो यत् पीडया क्रियते तपः
17.19b परस्योत्सादनार्थं वा तत् तामसम् उदाहृतम्
17.20a दातव्यम् इति यद्दानं दीयतेऽनुपकारिणे
17.20b देशे काले च पात्रे च तद्दानं सात्त्विकं स्मृतम्
17.21a यत् तु प्रत्युपकारार्थं फलम् उद्दिश्य वा पुनः
17.21b दीयते च परिक्लिष्टं तद्दानं राजसं स्मृतम्
17.22a अदेशकाले यद्दानम् अपात्रेभ्यश्च दीयते
17.22b असत्कृतम् अवज्ञातं तत् तामसम् उदाहृतम्
17.23a ओं तत् सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः
17.23b ब्राह्मणास्तेन वेदाश्च यज्ञाश्च विहिताः पुरा
17.24a तस्मादोम् इत्युदाहृत्य यज्ञदानतपःक्रियाः
17.24b प्रवर्तन्ते विधानोक्ताः सततं ब्रह्मवादिनाम्
17.25a तदित्यनभिसंधाय फलं यज्ञतपःक्रियाः
17.25b दानक्रियाश्च विविधाः क्रियन्ते मोक्षकाङ्क्षिभिः
17.26a सद्भावे साधुभावे च सदित्येतत् प्रयुज्यते
17.26b प्रशस्ते कर्मणि तथा सच्छब्दः पार्थ युज्यते
17.27a यज्ञे तपसि दाने च स्थितिः सदिति चोच्यते
17.27b कर्म चैव तदर्थीयं सदित्येवाभिधीयते
17.28a अश्रद्धया हुतं दत्तं तपस्तप्तं कृतं च यत्
17.28b असदित्युच्यते पार्थ न च तत् प्रेत्य नो इह

# Chapter 18

# मोक्षयोगः

18.a अर्जुन उवाच
18.1a संन्यासस्य महाबाहो तत्त्वम् इच्छामि वेदितुम्
18.1b त्यागस्य च हृषीकेश पृथक् केशिनिषूदन
18.2 श्रीभगवान् उवाच
18.2a काम्यानां कर्मणां न्यासं संन्यासं कवयो विदुः
18.2b सर्वकर्मफलत्यागं प्राहुस्त्यागं विचक्षणाः
18.3a त्याज्यं दोषवदित्येके कर्म प्राहुर्मनीषिणः
18.3b यज्ञदानतपःकर्म न त्याज्यम् इति चापरे
18.4a निश्चयं शृणु मे तत्र त्यागे भरतसत्तम
18.4b त्यागो हि पुरुषव्याघ्र त्रिविधः संप्रकीर्तितः
18.5a यज्ञदानतपःकर्म न त्याज्यं कार्यम् एव तत्
18.5b यज्ञो दानं तपश्चैव पावनानि मनीषिणाम्
18.6a एतान्यपि तु कर्माणि सङ्गं त्यक्त्वा फलानि च
18.6b कर्तव्यानीति मे पार्थ निश्चितं मतम् उत्तमम्
18.7a नियतस्य तु संन्यासः कर्मणो नोपपद्यते
18.7b मोहात् तस्य परित्यागस्तामसः परिकीर्तितः
18.8a दुःखम् इत्येव यत् कर्म कायक्लेशभयात् त्यजेत्
18.8b स कृत्वा राजसं त्यागं नैव त्यागफलं लभेत्
18.9a कार्यम् इत्येव यत् कर्म नियतं क्रियतेऽर्जुन
18.9b सङ्गं त्यक्त्वा फलं चैव स त्यागः सात्त्विको मतः
18.10a न द्वेष्ट्यकुशलं कर्म कुशले नानुषज्जते
18.10b त्यागी सत्त्वसमाविष्टो मेधावी छिन्नसंशयः
18.11a न हि देहभृता शक्यं त्यक्तुं कर्माण्यशेषतः

18.11b यस्तु कर्मफलत्यागी स त्यागीत्यभिधीयते
18.12a अनिष्टम् इष्टं मिश्रं च त्रिविधं कर्मणः फलम्
18.12b भवत्यत्यागिनां प्रेत्य न तु संन्यासिनां क्व चित्
18.13a पञ्चैतानि महाबाहो कारणानि निबोध मे
18.13b सांख्ये कृतान्ते प्रोक्तानि सिद्धये सर्वकर्मणाम्
18.14a अधिष्ठानं तथा कर्ता करणं च पृथग्विधम्
18.14b विविधाश्च पृथक्चेष्टा दैवं चैवात्र पञ्चमम्
18.15a शरीरवाङ्मनोभिर्यत् कर्म प्रारभते नरः
18.15b न्याय्यं वा विपरीतं वा पञ्चैते तस्य हेतवः
18.16a तत्रैवं सति कर्तारम् आत्मानं केवलं तु यः
18.16b पश्यत्यकृतबुद्धित्वान् न स पश्यति दुर्मतिः
18.17a यस्य नाहंकृतो भावो बुद्धिर्यस्य न लिप्यते
18.17b हत्वापि स इमाꣳल् लोकान् न हन्ति न निबध्यते
18.18a ज्ञानं ज्ञेयं परिज्ञाता त्रिविधा कर्मचोदना
18.18b करणं कर्म कर्तेति त्रिविधः कर्मसंग्रहः
18.19a ज्ञानं कर्म च कर्ता च त्रिधैव गुणभेदतः
18.19b प्रोच्यते गुणसंख्याने यथावच्छृणु तान्यपि
18.20a सर्वभूतेषु येनैकं भावम् अव्ययम् ईक्षते
18.20b अविभक्तं विभक्तेषु तज् ज्ञानं विद्धि सात्त्विकम्
18.21a पृथक्त्वेन तु यज् ज्ञानं नानाभावान् पृथग्विधान्
18.21b वेत्ति सर्वेषु भूतेषु तज् ज्ञानं विद्धि राजसम्
18.22a यत् तु कृत्स्नवदेकस्मिन् कार्ये सक्तम् अहैतुकम्
18.22b अतत्त्वार्थवदल्पं च तत् तामसम् उदाहृतम्
18.23a नियतं सङ्गरहितम् अरागद्वेषतः कृतम्
18.23b अफलप्रेप्सुना कर्म यत् तत् सात्त्विकम् उच्यते
18.24a यत् तु कामेप्सुना कर्म साहंकारेण वा पुनः
18.24b क्रियते बहुलायासं तद्राजसम् उदाहृतम्
18.25a अनुबन्धं क्षयं हिंसाम् अनपेक्ष्य च पौरुषम्
18.25b मोहादारभ्यते कर्म यत् तत् तामसम् उच्यते
18.26a मुक्तसङ्गोऽनहंवादी धृत्युत्साहसमन्वितः
18.26b सिद्ध्यसिद्ध्योर्निर्विकारः कर्ता सात्त्विक उच्यते
18.27a रागी कर्मफलप्रेप्सुर्लुब्धो हिंसात्मकोऽशुचिः
18.27b हर्षशोकान्वितः कर्ता राजसः परिकीर्तितः
18.28a अयुक्तः प्राकृतः स्तब्धः शठो नैकृतिकोऽलसः
18.28b विषादी दीर्घसूत्री च कर्ता तामस उच्यते
18.29a बुद्धेर्भेदं धृतेश्चैव गुणतस्त्रिविधं शृणु

18.29b प्रोच्यमानम् अशेषेण पृथक्त्वेन धनंजय
18.30a प्रवृत्तिं च निवृत्तिं च कार्याकार्ये भयाभये
18.30b बन्धं मोक्षं च या वेत्ति बुद्धिः सा पार्थ सात्त्विकी
18.31a यया धर्मम् अधर्मं च कार्यं चाकार्यम् एव च
18.31b अयथावत् प्रजानाति बुद्धिः सा पार्थ राजसी
18.32a अधर्मं धर्मम् इति या मन्यते तमसावृता
18.32b सर्वार्थान् विपरीतांश्च बुद्धिः सा पार्थ तामसी
18.33a धृत्या यया धारयते मनःप्राणेन्द्रियक्रियाः
18.33b योगेनाव्यभिचारिण्या धृतिः सा पार्थ सात्त्विकी
18.34a यया तु धर्मकामार्थान् धृत्या धारयतेऽर्जुन
18.34b प्रसङ्गेन फलाकाङ्क्षी धृतिः सा पार्थ राजसी
18.35a यया स्वप्नं भयं शोकं विषादं मदम् एव च
18.35b न विमुञ्चति दुर्मेधा धृतिः सा पार्थ तामसी
18.36a सुखं त्विदानीं त्रिविधं शृणु मे भरतर्षभ
18.36b अभ्यासाद्रमते यत्र दुःखान्तं च निगच्छति
18.37a यत् तदग्रे विषम् इव परिणामेऽमृतोपमम्
18.37b तत् सुखं सात्त्विकं प्रोक्तम् आत्मबुद्धिप्रसादजम्
18.38a विषयेन्द्रियसंयोगाद्यत् तदग्रेऽमृतोपमम्
18.38b परिणामे विषम् इव तत् सुखं राजसं स्मृतम्
18.39a यदग्रे चानुबन्धे च सुखं मोहनम् आत्मनः
18.39b निद्रालस्यप्रमादोत्थं तत् तामसम् उदाहृतम्
18.40a न तदस्ति पृथिव्यां वा दिवि देवेषु वा पुनः
18.40b सत्त्वं प्रकृतिजैर्मुक्तं यदेभिः स्यात् त्रिभिर्गुणैः
18.41a ब्राह्मणक्षत्रियविशां शूद्राणां च परंतप
18.41b कर्माणि प्रविभक्तानि स्वभावप्रभवैर्गुणैः
18.42a शमो दमस्तपः शौचं क्षान्तिरार्जवम् एव च
18.42b ज्ञानं विज्ञानम् आस्तिक्यं ब्रह्मकर्म स्वभावजम्
18.43a शौर्यं तेजो धृतिर्दाक्ष्यं युद्धे चाप्यपलायनम्
18.43b दानम् ईश्वरभावश्च क्षात्रं कर्म स्वभावजम्
18.44a कृषिगोरक्ष्यवाणिज्यं वैश्यकर्म स्वभावजम्
18.44b परिचर्यात्मकं कर्म शूद्रस्यापि स्वभावजम्
18.45a स्वे स्वे कर्मण्यभिरतः संसिद्धिं लभते नरः
18.45b स्वकर्मनिरतः सिद्धिं यथा विन्दति तच्छृणु
18.46a यतः प्रवृत्तिर्भूतानां येन सर्वम् इदं ततम्
18.46b स्वकर्मणा तम् अभ्यर्च्य सिद्धिं विन्दति मानवः
18.47a श्रेयान् स्वधर्मो विगुणः परधर्मात् स्वनुष्ठितात्

18.47b स्वभावनियतं कर्म कुर्वन् नाप्नोति किल्बिषम्
18.48a सहजं कर्म कौन्तेय सदोषम् अपि न त्यजेत्
18.48b सर्वारम्भा हि दोषेण धूमेनाग्निरिवावृताः
18.49a असक्तबुद्धिः सर्वत्र जितात्मा विगतस्पृहः
18.49b नैष्कर्म्यसिद्धिं परमां संन्यासेनाधिगच्छति
18.50a सिद्धिं प्राप्तो यथा ब्रह्म तथाप्नोति निबोध मे
18.50b समासेनैव कौन्तेय निष्ठा ज्ञानस्य या परा
18.51a बुद्ध्या विशुद्धया युक्तो धृत्यात्मानं नियम्य च
18.51b शब्दादीन् विषयांस्त्यक्त्वा रागद्वेषौ व्युदस्य च
18.52a विविक्तसेवी लघ्वाशी यतवाक्कायमानसः
18.52b ध्यानयोगपरो नित्यं वैराग्यं समुपाश्रितः
18.53a अहंकारं बलं दर्पं कामं क्रोधं परिग्रहम्
18.53b विमुच्य निर्ममः शान्तो ब्रह्मभूयाय कल्पते
18.54a ब्रह्मभूतः प्रसन्नात्मा न शोचति न काङ्क्षति
18.54b समः सर्वेषु भूतेषु मद्भक्तिं लभते पराम्
18.55a भक्त्या माम् अभिजानाति यावान् यश्चास्मि तत्त्वतः
18.55b ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम्
18.56a सर्वकर्माण्यपि सदा कुर्वाणो मद्व्यपाश्रयः
18.56b मत्प्रसादादवाप्नोति शाश्वतं पदम् अव्ययम्
18.57a चेतसा सर्वकर्माणि मयि संन्यस्य मत्परः
18.57b बुद्धियोगम् उपाश्रित्य मच्चित्तः सततं भव
18.58a मच्चित्तः सर्वदुर्गाणि मत्प्रसादात् तरिष्यसि
18.58b अथ चेत् त्वम् अहंकारान् न श्रोष्यसि विनङ्क्ष्यसि
18.59a यदहंकारम् आश्रित्य न योत्स्य इति मन्यसे
18.59b मिथ्यैष व्यवसायस्ते प्रकृतिस्त्वां नियोक्ष्यति
18.60a स्वभावजेन कौन्तेय निबद्धः स्वेन कर्मणा
18.60b कर्तुं नेच्छसि यन् मोहात् करिष्यस्यवशोऽपि तत्
18.61a ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति
18.61b भ्रामयन् सर्वभूतानि यन्त्रारूढानि मायया
18.62a तम् एव शरणं गच्छ सर्वभावेन भारत
18.62b तत्प्रसादात् परां शान्तिं स्थानं प्राप्स्यसि शाश्वतम्
18.63a इति ते ज्ञानम् आख्यातं गुह्याद्गुह्यतरं मया
18.63b विमृश्यैतदशेषेण यथेच्छसि तथा कुरु
18.64a सर्वगुह्यतमं भूयः शृणु मे परमं वचः
18.64b इष्टोऽसि मे दृढम् इति ततो वक्ष्यामि ते हितम्
18.65a मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु

18.65b माम् एवैष्यसि सत्यं ते प्रतिजाने प्रियोऽसि मे
18.66a सर्वधर्मान् परित्यज्य माम् एकं शरणं व्रज
18.66b अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः
18.67a इदं ते नातपस्काय नाभक्ताय कदा चन
18.67b न चाशुश्रूषवे वाच्यं न च मां योऽभ्यसूयति
18.68a य इदं परमं गुह्यं मद्भक्तेष्वभिधास्यति
18.68b भक्तिं मयि परां कृत्वा माम् एवैष्यत्यसंशयः
18.69a न च तस्मान् मनुष्येषु कश्चिन् मे प्रियकृत्तमः
18.69b भविता न च मे तस्मादन्यः प्रियतरो भुवि
18.70a अध्येष्यते च य इमं धर्म्यं संवादम् आवयोः
18.70b ज्ञानयज्ञेन तेनाहम् इष्टः स्याम् इति मे मतिः
18.71a श्रद्धावान् अनसूयश्च शृणुयादपि यो नरः
18.71b सोऽपि मुक्तः शुभाश्ल् लोकान् प्राप्नुयात् पुण्यकर्मणाम्
18.72a कच्चिदेतच्छ्रुतं पार्थ त्वयैकाग्रेण चेतसा
18.72b कच्चिदज्ञानसंमोहः प्रनष्टस्ते धनंजय
18.7b अर्जुन उवाच
18.73a नष्टो मोहः स्मृतिर्लब्धा त्वत्प्रसादान् मयाच्युत
18.73b स्थितोऽस्मि गतसंदेहः करिष्ये वचनं तव
18.74 संजय उवाच
18.74a इत्यहं वासुदेवस्य पार्थस्य च महात्मनः
18.74b संवादम् इमम् अश्रौषम् अद्भुतं रोमहर्षणम्
18.75a व्यासप्रसादाच्छ्रुतवान् एतद्गुह्यम् अहं परम्
18.75b योगं योगेश्वरात् कृष्णात् साक्षात् कथयतः स्वयम्
18.76a राजन् संस्मृत्य संस्मृत्य संवादम् इमम् अद्भुतम्
18.76b केशवार्जुनयोः पुण्यं हृष्यामि च मुहुर्मुहुः
18.77a तच्च संस्मृत्य संस्मृत्य रूपम् अत्यद्भुतं हरेः
18.77b विस्मयो मे महान् राजन् हृष्यामि च पुनः पुनः
18.78a यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः
18.78b तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम